SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 05
August 2025, Price Rs.20/-
No. of pages-24

तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

आगस्ट् - २०२५
रू.२०/-



## श्रीवरलक्ष्मीव्रतम् (08.08.2025)





## तिरुमल
## श्रीवेङ्कटेश्वरस्वामिनः नवरात्रि ब्रह्मोत्सवः
### 2025 सेप्टम्बर् 23 तः अक्टोबर् 02 पर्यन्तम्

| दिनाङ्क | वासरः | प्रातः उत्सवः | रात्रौ उत्सवः |
|---|---|---|---|
| 23-09-2025 | भौम्यवासरः | ... | सेनाधिपति- उत्सवः, अङ्कुर्रापणम् |
| 24-09-2025 | सौम्यवासरः | तिरुच्चि उत्सवः ध्वजारोहणम् | महाशेषवाहनम् |
| 25-09-2025 | बृहस्पतिवासरः | लघुशेषवाहनम् | हंसवाहनम् |
| 26-09-2025 | भृगुवासरः | सिंहवाहनम् | मौक्तिकवाहनम् |
| 27-09-2025 | मन्दवासरः | कल्पवृक्षवाहनम् | सर्वभूपालवाहनम् |
| 28-09-2025 | भानुवासरः | आन्दोलिकायां मोहिन्यवतारोत्सवः | गरुडवाहनम् |
| 29-09-2025 | इन्दुवासरः | हनुमद्वाहनम् सायं - वसन्तोत्सवः स्वर्णरथरङ्गडोलोत्सवः | गजवाहनम् स्वर्णरङ्गडोलत्सवः |
| 30-09-2025 | भौम्यवासरः | सूर्यप्रभवाहनम् | चन्द्रप्रभवाहनम् |
| 01-10-2025 | सौम्यवासरः | रथोत्सवः | अश्ववाहनम् |
| 02-10-2025 | बृहस्पतिवासरः | चक्रस्नानम् | तिरुच्चि उत्सवः, ध्वजावरोहणम् |



श्रीभगवानुवाच -

# गीतामृतम्

यस्सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।

(भगवद्गीता २.५७-५८)

५७. भावः - यः तत्तच्छुभाशुभे प्राप्य मनोविकाररहितः शुभप्राप्तौ अभिनन्दनं न प्रकटयन् दुःखे प्राप्ते द्वेष रहितः भवति। तस्य ज्ञानं सुस्थितरमिति ज्ञेयम्।

विशेषांशः - ब्रह्मज्ञानी द्वन्द्वातीतः भवति। समुद्रमध्यस्थपोतः तरङ्गैः चलति। तीरस्थपोतः न चलति। द्वद्वरहितस्य, संसारसागरतर्तुः च लक्षणानि एवमेव भवन्ति।

५८. भावः - यदा कूर्मः स्वावयवान् आत्मन्येव उपसंहरते एवं योगी यदा स्वेन्द्रियाणि इन्द्रियार्थशब्दादिविषयेभ्यः समुपसंहरति। तदा तस्य आत्मज्ञानं सुस्थिरं भवति। अयमेव संयमी अथवा स्थितप्रज्ञः इति कथ्यते।

विशेषांशः - मुमुक्षवः त्रिविधाः। मीन, मृग, कूर्मवृत्तिमन्तः इति, जले, मृगः भूमौ, कूर्मः भूमौ जले च समानतया जीवन्ति। कूर्मवत् विजनप्रदेशे संसारजनस्तोमे एकविधत्वेन वर्तमानः अविचलद्ज्ञानवान् प्रवक्ता भवति। अन्ये समान्यभक्तेषु मुमुक्षु अन्तर्गताः भवन्ति।

# सङ्कीर्तनम्



भावयामि गोपालबालं मन
स्सेवितं तत्पदं चिन्तयेयं सदा
कटिघटितमेखलाखचितमणिघण्टिका
पटलनिनदेन विभ्राजमानम्
कुटिलपदघटित सङ्कुलशिञ्जिते नतं
चटुलनटनासमुज्ज्वलविलासम्
निरतकरकीलितनवनीतं ब्रह्मादि
सुरनिकरभावनाशोभित पदम्
तिरुवेङ्कटाचल स्थितमनुपमं हरिं
परमपुरुषं गोपालबालकम्।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम्)

सम्पादकीयम्

# प्रकृतिरक्षणमेव पर्वणः परमार्थः

वक्रतुण्डंमहाकायं कोटिसूर्यसमप्रभाम्।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।

विनायकचतुर्थीपर्व बहून् सन्देशान् मानवाळेः प्रदाथकपर्वदिनम्। प्रकृतिपरतया अस्माकं स्पष्टं सन्देशं इदं पर्व ददाति। भक्ताः कानिचित्पर्वाणि भक्तिश्रद्धाभ्यां गृहपरिमिततया निर्वहन्ति।

प्रकृतिमातुः पार्वती देव्याः तनयः एव विनायकः। प्रकृति मातुः दिव्यशरीरे उद्वर्तनचूर्ण ओषधीमयेन प्राप्तप्राणः देवः विनायकः। अयं सस्यानां विनायकं मूषिकं स्ववाहनश्चकार। धान्ये व्यर्थपरिहाराय शूर्पाः उपयुज्यते। शूर्पपरिमाणौ कर्णौ। सम्यक्, समृद्ध्या सस्यफले जाते तद्वाचकतया गजफलं लब्धमिति वदन्ति। समृद्धसस्यफलचिह्नतया विनायकः गजशिरः धरति। फलितसस्य-धान्यं बृहद्धान्यागारेषु वेत्रनिर्मितेषु भद्रीकुर्वन्ति। एतादृश धान्यागरवत् बृहच्छरीरधारी विनायकः। तस्य एकदन्तः हलचिह्नतया वर्तते। भक्ष्यविशेषान् क्षेत्रात् सस्यफलागमनप्रथमसमये नैवेद्यत्वेन विनायकाय समर्पयन्ति। धान्यागारं परिवृत्य तृणनिर्मितरज्जुबन्धनं कुर्वन्ति। लम्बोदरोदरपरितः नागपाशः बद्धः वर्तते। गणेश निमज्जनं कृत्वा तस्मात् मृदादाय धान्यागारे, सस्यक्षेत्रेषु पण्यविक्रयशालासु कृषीवलाः, वैश्याः पण्यवस्तुपदार्थं विक्रयकारिणः विकिरन्ति। विनायकः सस्यधान्यानां प्रकृतेश्च प्रतिरूपत्वेन आराध्यते। वर्षाकालप्रारम्भात् आरभ्य वृक्षैः सस्यश्यामलभूपर्यावरणं हरितवस्त्रं धृतमिव प्रकाशमाने काले इदं विनायक पर्व आगच्छति। ग्रीष्मकाले शुष्कवृक्षाः पुनः नूतनपल्लवैः नूतनशोभया विराजन्ते।

विनायकचतुर्थी व्यवसायरङ्गाय प्रकृतिपरिरक्षणाय यथोपयुक्तं स्यात् तथा पूर्वीकैः परिकल्पिता। आद्यवर्षात् तटाकेषु जलाशयेषु मृत् आद्रा स्यात्। तां मृदं ग्रामस्थाः आनीय विनायक प्रतिमाः कृत्वा विनायकं पूजयन्ति। एवं ग्राम समीपस्थ तटाकेभ्यः, जलाशयेभ्यः, एकैकः कुटुम्बः मृदानयति। ग्रामवीथीयुवकाः मृदं खनित्वा गृहमानयन्ति। एवं मृदा बृहद्विनायक विग्रहान् आनीय प्रतिष्ठापयन्ति। तटाकेषु पूरितमृदं स्वयमानीय स्वस्थले एकत्रनिवेशनात् तटाकस्य जलाभिवृद्धिकरः भवन्ति। पत्रैः विनायकं पूजयन्ति। तदर्थं बहुविधवृक्षेभ्यः पत्राणि गृहमानयन्ति। अतः नूतनपत्राविर्भावात् वृक्षस्य जीवकला आगच्छति। कालपरिणामात् पत्रेषु कृमिकीटकैः विनाशः भवति स्म। पत्रखण्डनात् कृमिकीटकेभ्यः विमुक्तिरपि स्यात्। भाद्रपदाश्वयुजमासेषु वर्षात् वृद्धाः वृक्षाः पर्यावरणसमतुल्यं अवकाशं ददति। नवदिनपर्यन्तं विनायकपूजाः समाप्य सर्वे विनायकप्रतिमाः समीपतटाके जलाशये निमज्जनं कुर्वन्ति। अतः तटाके मृत् पुनरुपयोगाय उपयुक्ता भवति। तटाकतीरावधिः अपि पटिष्टं भवितुमवकाशः लभ्यते। विनायकपूजापत्राणां तटके पातनात् प्रत्रादागतरसाः प्रकृतिपरतया जलस्य औषधगुणान् कल्पयन्ति। जलमिश्रितपत्ररसाः जलशुद्धीकरणाय व्यवसायोपयुक्तजलाय नूतन शक्तिं प्रददति। प्राचीनव्यवस्थेयं सर्वाऽपि। अद्य भिन्नतया विनायकचतुर्थीपर्वदिनं निर्वहन्ति। विग्रहौन्नत्यार्थं मृत्स्थाने पर्यावरणविनाशक ''प्लास्टर् आफ् प्यरीस्'' उपयुज्यते, नेदमुचितम्। एवं विग्रहाकर्षणीयत्वाय हानिकरचित्रीकरणलेप नानि (पैण्टस् उपयुज्यन्ते। एतत्स्थाने साम्प्रदायिक वर्णद्रव्याणि उपयोक्तुं प्रयत्नः कर्तव्यः। पर्यावरणपरिरक्षकत्वदिशा अस्मादालोचनानि भवतिव्यानि। अस्मिन् सूक्ष्मविषये परिणामः आवश्यकः। भक्ताभिलषितवांछापूरणाय भक्ति श्रद्धाभ्यां विनायकं पूजयत्वा तदाशीः प्राप्तुं, भाविजनानां प्रकृतिसफलप्रदानाय सर्वैर्मेधाविभिरालोचनीयम्।

ध्यानम् - गणानां त्वा गणपति गुं हवामेह कविं कवीनां उपमश्रवन्त मम
ज्येष्ठाजं ब्रह्मणां ब्रह्मणस्पत आनश्शुण्वन्नूतिभिस्सीद साधनम्।।

छिद्रेष्वनर्था बहुली भवन्ति।

# आगस्ट् - २०२५

सम्पुटिः-१२ सञ्चिका-०५

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर श्रावणशुद्धअष्टमीशक्रवारादारभ्य - भाद्रपदशुद्धसअष्टमी आदिवारपर्यन्तम् - २०२५


| | |
|---|---|
| तुलसीमाहात्म्यम् | 06 |
| - डा पि.माधवी | |
| तरिगोण्डवेङ्गमाम्बा-वर्धन्ती | 08 |
| - डा के.कोटेश्वरय्य | |
| विखनसमुनिजयन्ती | 09 |
| - आचार्य जि.पद्मनाभम् | |
| सिद्धिविनायकव्रतकल्पः | 11 |
| विनायकव्रतकथा | 15 |
| हयग्रीवजयन्ती | 18 |
| - कुमारी लिङ्गरेड्डि उमामहेश्वरी | |
| विनायकाय प्रथमनमस्काराभावे विघ्नाः एव (चित्रकथा) | 20 |
| - डा.के.सूर्यनारायणरेड्डि | |
| बालविनोदिनी | 22 |


मुखचित्रम् - श्रीलक्ष्मीदेवी।
अन्तिमपुटचित्रम्ः- श्रीविनायकस्वामी।
(चित्रकारः श्री पश्चकर्ल रमेश्)


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
सम्पादकः,
०८७७ - २२६४३६०

सूचनानाम्, आक्षेपाणां च कृते सम्पर्कं कुर्वन्तु -

chiefeditortpt@gmail.com



एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-


*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*

## तिरुमलतिरुपतिदेवस्थानम्
# सप्तगिरिः
### आध्यात्मिकसचित्रमासपत्रिका




गौरवसम्पादकः-
श्री जे.श्यामला राव्, I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः, ति.ति.दे.



सूचना
मुद्रितलेखानां विचाराः लेखकानामेव। एतद्विषये अस्माकं दायित्वं नास्ति।
– *प्रधानसम्पादकः*



# तुलसीमाहात्म्यम्


- डा.पि.माधवी,

चरवाणी - ८५१९८०४७८४


तुलसीपूजाव्रतम् आगस्ट् ६ तिथौ ति.ति.देवस्थानं निर्वहति तुलसी माहात्म्यमधिकृत्य पद्म, स्कान्द, गरुड, ब्रह्मवैवर्त, श्रीबृहत्ब्रह्मपुराण, कालिका ब्रह्मवैवर्त, कालिका, ब्रह्मनारदीय, बृहन्नारदीय मत्स्यसक्त तुलसीगीता, श्री मद्भागवत, देवीभागवत, वासुदेवोपविषत् रामरहस्योपनिषत् - अगस्त्यसंहिता विष्णु धर्मोत्तरादिपुराणग्रन्थेषु सम्यगुपवर्णितम्।

श्रीमद्भावते तुलसीमाहात्म्यम् नारदं प्रति महादेवः त्रिचत्वारिंशत् श्लोकेषु प्रोवाच।

१. ''तुलसीद्रुमरूपस्तु भगवान् पुरुषोत्तमः सर्वलोकपवित्राता विश्वात्मा विश्वपालकः''

२. दर्शनात्स्पर्शनान्नाम कीर्तनाद्धारणादपि प्रदानात् पापसंहार्ती नराणां तुलसी सदा।

३. प्रातस्थाय सुस्नातो यः पश्ये तुलसीद्रुमं।
ससर्वतीर्थसंदृष्टिफलमान्पोत्यसंशयम्

४. तुलस्याः श्रुणुमाहात्म्यं संक्षेपेण महामते।
यच्छृत्वा सर्वपापेभ्यो नरोमुक्तिमवान्पुयात्॥

**तुलसीजननं देवी भागवतमनुसृत्य -**

तुलसी पूर्वजन्मनि गोलोकवासिनी श्रीकृष्णस्य प्रणयपात्रा गोपिका आसीत्। सा श्रीकृष्णांशस्वरूपगोपालेन सरससल्लापं कुर्वन्ती राधादेव्या दृष्टा तत्कोपात् भूलोकपतनशापमावाप। शापतिमोचनाय राधां प्रर्थितवती। तदा सा राधा हे गोपिके! त्वं भूलोके जन्म गृहीत्वा तपसा ब्रह्माणं तोषयित्वा तद्वरात् मदंशं प्राप्स्यसीत्यभयं दत्वा अन्तर्दधौ। राधिकाशापात् भारतदेशे धर्मध्वजराज पत्न्याः माधव्याः गर्भेकार्तिकमासपूर्णिमाशुक्रवासरे सुतेव अजायत असमानसौन्दर्यवतीयं तुलसीति नाम्ना मातपितृभ्यां कृतनामकरणा आसीत्। बाल्यदेव बदरिकाश्रमं गत्वा विष्णुमूर्तिरेव मम भार्ता भवत्विति घोरंतपश्चकार। तपसा साक्षात्कृत ब्रह्मणा गोलोकवासिनी राधिकांशे भारतदेशे गृहीतस्त्रीजन्माहमित्युक्त्वा श्रीमन्नारायणं भर्तारामिवप्राप्तुं वरं देहीत्यपृच्छत्। तच्छृत्वा ब्रह्मा तामुद्दिश्य हेतुलसि! कृष्णांशसम्भूत सुदामनामगोपकः त्वां दृष्ट्वा प्रेमपतित -विषयं ज्ञात्वा राधिकाशापात् भूलोके राक्षस जन्मगृहीत्वा शंखचूडनाम्ना प्रसिद्धः प्रकाशते। त्वं तस्य पत्नीभव। तदनन्तरं श्रीमन्नारायणं भर्तारमिव प्रप्य तत्कृपया वृक्षरूपं प्राप्य सकलदेवदानवमानवैः पूज्या भविष्यसीति वरं ददौ।

ततः शंखचूडः जैगीषव्यमुनिसकाशात् कृष्णमन्त्रोपदेशं प्राप्य पुष्करतीर्थे मन्त्रजप-सिद्धिं प्राप्य सर्वमङ्गलकवचं धृत्वा ब्रह्मणः अनुग्रहात् बदरिकाश्रमं गत्वा तत्र तुलसीमपश्यत्। उभावपि पूर्वजन्मज्ञानात् प्रेमानुरागबद्धौ ब्रह्मणः आदेशात् गान्धर्वनिवाहपद्धत्या दम्पती अभवताम्। ततः धर्मबद्ध गृहस्थाश्रमे कालमयापयताम्। सर्वाजेयत्वसम्पादने देवदानवगन्धर्वान् पराजितान् चकार। देवाः ते शंख चूडपीडिताः रक्षणार्थं ब्रह्माणशिवञ्च प्रार्थयामासुः। ततः ताभ्यां अफलाभिलाषाः विष्णुसकशं जम्भुः। तदा विष्णुः स्वत्रिशूलं शिवाय दत्वा युद्धे शखचूडं संहर इत्यवोचत्, ततः विष्णुः शंखचूडास्य भार्यायाः पातिव्रत्यभङ्गेनैव शंखचूडहं हन्तुं शक्यते इति ब्राह्मणवेषं धृत्वा शंखचूडं याचित्वा सर्वमङ्गलकवचं दानरूपेण प्राप्य मायया शंखचूडरूपं धृत्वा सर्वमङ्गलकवचं धृत्वा तुलसीगृहं जगाम तुलसी भर्तैव युद्धे विजयं प्राप्य आगतः इति भ्रमात् मोहात्



गृहं गृहमित्याहुः गृहिणी गृहमुच्यते।

पातिव्रत्यभङ्गमवाप। पश्चत् सा विष्णुं माया शंखचूडः इति ज्ञात्वा तं शिलारूपं प्राप्नुहि इति शशाप। विष्णुः विजरूपं दधार। तदा तुलसी विष्णुपादयोः पतित्वा क्षमामयायत। तदा विष्णुः सान्त्वयन् त्वं मां पतिं प्राप्तुं तपः कृतवती। शंखचूडोऽपि त्वां भार्यां प्राप्तुं तपः कृत्वा सफलः सञ्जातः। अद्य त्वत्तपःफलतया दिव्यशरीरं धृत्वा शश्वत् मयि, स्थास्यसि। भारतदेशे तव शरीरं गण्डकीति पुण्यनदीरूपेण त्वत्केशाः त्वन्नामा तुलसीति पवित्रोषधीरूपेण भविष्यन्ति। सकलस्थावरपुष्पपत्रायेक्षया तुलसीपत्राणि श्रेष्ठणि भविष्यन्ति। पवित्रतुलसी सर्वलोककेषु पुण्यभूमौ भारते उद्भविष्यति। नित्यं तुलसी धारणात् दानात् श्रीहरिकरुणापात्राः भविष्यन्ति। त्वं गण्डकीतीरे सालग्रामरूपं प्राप्स्यसि। तत्र तीक्ष्णदन्त विशिष्टकीटकाः मां प्राप्य चक्राणि रचयिष्यन्ति। तादृशचक्राकृतिचिह्नभेदैः अहं लक्ष्मीनारायणसुदर्शनादिनामभिः बहुनामकः भविष्यामि। यत्र सालग्रामः तत्रहं लक्ष्म्या, वसेयम्। सालग्रामपूजा जीवन्मुक्तिप्रदा। विनातुलसीपूजा सालग्रामपूजा भार्याविच्छेदकारिणी स्यात्। तुलसीरहितशंखपूजा सप्तजन्मान्त भार्याविहीनः रोगपीडितः स्यात्। सालग्राम शखतुलसी त्रयाणां एकत्र पूजाकारी महाज्ञानी मत्प्रियः स्यादित्युक्त्वा विष्णुः अन्तर्दधे।

**तुलसीगाथा -**

इन्द्रः परमशिव दर्शनार्थं शिवलोकं गच्छन् मार्गमध्ये भयङ्कपुरुषमपश्यत्। तं शिवः कुत्र वर्तते इत्युपृच्छत्।



तस्मात्समाधनाभावात् कृद्धः इन्द्रः कोपोद्रिक्तः तं वज्रायुधघातं चकार। तस्मात् घातात् रुद्रतेजः प्रज्वलितमासीत्। तदा भीतः इन्द्रः रुद्रप्रार्थनाञ्चकार। सन्तुष्टः रुद्रः स्वफालनयनादागत कोपाग्निं गङ्गासागरे पातयामास? सः अग्निः सागरे बालरूपं धृत्वा रुदन्नसीत्।तद्रोदनशब्दात् सप्तलोकाः बधिरप्रायाः जाताः। तदा ब्रह्मा तदूबालसकाशं गत्वा कस्त्वमिति पप्रच्छ। तदा समुद्रः अयं मम पुत्रः अस्य जातकर्मादीनि, कुर्विति शिशुं ब्रह्महस्तगतञ्चकार। बालकः ब्रह्मणः चिबुकं चालयामास। तदा ब्रह्मणः नेत्रद्वयात् जलबिन्दवः प्रसृताः। नयनाभ्यां जलबिन्दपतनकारणमज्ञातोऽपि ब्रह्मा तस्य बालकस्य ''जलन्धरः'' इति नाम चकार। ततः रुद्रेण न कोऽप्यन्योनिहन्यादिति शुक्राचार्यद्वारा असुरराज्यपट्टाभिषिक्तञ्चकार। सः जलन्धरः राज्यभारं वहन् कालनेमिसुतां बृन्दां पर्यणैषीत्। ततः शिवमुद्दिश्य घोरतपः कृत्वा शिववरात् सर्वदेवपीडाकरः आसीत्। ततः देवा विष्णु शरणं ययुः। जलन्धरः शिवेनापि युद्धञ्चकार। विष्णुः पार्वतीदेव्यतुमत्या जलन्धररूपं धृत्वा मायया तस्याः बृन्दायाः पातिव्रत्यभङ्गञ्चकार। पातिव्रत्यभङ्गात् शिवेन हतः जलन्धरः। तस्य जलन्धरस्य शिरः बृन्दायाः अङ्के अपतत्। बृन्दा विष्णुं शपित्वा भर्त्रा सहगमनं चकार। पश्चात्तप्तः विष्णुः बृन्दां तुलसीवृक्षत्वेन जलन्धरं, अत्तपत्ति(मुडुपतामर) रूपेण जातुं अनुग्रहवरं ददौ। एतयोः द्वयोः वृक्षयोः महाशक्तिर्वर्तते। एकत्र तुलसी-अत्ततूलदर्शनात् जलादिभिः तद्वर्धनात् नित्यपूजया च महफलं लभेत्। अत्ततूलशरीरस्य, तुलसी एव प्राणाः। एतयोः भक्ताभीष्टफलप्रदशक्तिरस्तीति महद्वचनम्।

मनोवाक्दृढत्वहीनैः अशान्तै दुष्टशक्तिपीडितैः विवाह प्रतिबन्धकैः स्वकामितार्थफलसिद्धयर्थं एवमाचरणीयम् - परिशुभ्र मनसा, शरीरेण सूर्योदयात्पूर्वं उत्थाय सोमवारे तुलसी अत्ततूलपरिवर्धित स्थलपरिशुभ्रंकृत्वा धूपदीपनैवेद्यादि समर्प्य २१ पर्यायं प्रदक्षिणीकृत्य एकग्रचित्तेन ध्यानात् सर्वरोग विमुक्तिः लक्ष्मीकटक्षादभीष्टसिद्धिश्च स्यात्। (अनुवर्तिष्यते)

# तरिगोण्डवेङ्गमाम्बा- वर्धन्ती



- डा.के.कोटेश्वरय्य,

चरवाणी - ९९८५१२३२६२

तरिगोण्ड वेङ्गमाम्बा वर्धन्ती २०२५ आगस्ट् द्वितीयाथिः अष्टादशशताब्द्यां तरिगोण्डग्रामनिवासी कानालकृष्णय्यामात्यः शिष्टमानसः सच्छीलललितहृदयः सद्ब्रह्मवेत्ता आसीत्। तस्य पतिव्रता अनुकूलवती मङ्गमाम्बानाम्नी भार्या आसीत्। एतौ सन्तानप्राप्त्यर्थं तिरुमल वेङ्कटेश्वरस्वामिनं प्रार्थयामासतुः। दैवभक्त्या तयोः नृसिंहजयन्ती पर्वदिने वेङ्कटेश्वरानुग्रहात् वेङ्गमाम्बेतिकृतनाम्नी पुत्री अजायत।

**बाल्यम् -** सदाचारतत्त्वचिन्तनापरकुटुम्बत्वात् भक्तिभावविकसितहृदया वेङ्कटेश्वरगीतालापनक्रीडादिभिः बाल्यादेव वेङ्गमाम्बा मातापितरौ बन्धून् सन्तोषयति स्म। पूर्वीककानालकविपण्डितवंशाः इव तप्तिता परोपकार वेदान्ती सन् भारतभागवतारामायणादिग्रन्थ घट्टान् ग्रामेभ्यः श्रावयति स्म। वेङ्गमाम्बापि तानि पौराणिकप्रवचनानि श्रृण्वन्ती साहित्य प्रज्ञां सम्पादयामास। मातृकृतपूजा व्रतसारस्वतसंस्काराः वेङ्गमाम्बा भक्तिज्ञानवर्धनाय उपकृताः आसन्। भक्ति पारवश्यात् ग्रामवीथीगाननाट्यदिभिः विचित्रपद्धतिभिः भीतः पिता तां अधिकतया गृहकृत्येषु नियोजयति स्म।

असूयापरैः ग्रामस्थैः प्रेरितः कृष्णयामात्यः वेङ्गमाम्बायाः विवाहप्रयत्ने निमग्नः झटिति विवाहाय अङ्गीकर्तुं तस्यां कठिन तीव्रवाचः प्रयुयोज। सा भगवान् वेङ्कटरमणः एव मम पतिरिति पितरं प्रोवाच। तथापि, पितृप्रोद्बलात् परिणेतुमङ्गीचकार। पितुः कृष्णयार्यप्रयत्नफलात् चित्तूरुसमीपस्थनारगुण्टपाले तिम्मयार्यनामक सम्पन्न गृहस्थ पुत्रेण वेङ्कटाचलपतिनाम्ना वेङ्गमाम्बायाः विवाहः वैभवोपेततया निर्वाहितः। मनसा वाचा कर्मणा श्रीनिवासाङ्कितायाः मम केनचित् बाल्यविवाहः कारितः इति पितरमुवाच। युक्तवयसि प्राप्ते तस्याः निषेकमुहूर्तं निश्चितमासीत्। शोभनवमन्दिरप्रविष्ठवरं उद्दिश्य सा अहं वेङ्कटाचलपत्नी, आन्तरङ्गिकभक्तिमतीति त्वत्सङ्गमाय नाङ्गीकरिष्यामि क्षन्तव्या- स्मीति सधैर्यप्रोवाच। वरस्य वधूः वेङ्गमाम्बा स्वकुलदेवतारुपचोडमाम्बेव अदृश्यत। अतस्सः तामस्पृष्ट्वा भीत्यास्वकुलदेवतां संस्मृत्य शोभनगृहात् बहिराजगामा। तस्यावरस्य जीविते विफले विवाहे चिन्तया विधिावशात् भर्ता वेङ्कटाचलपतिः परमपदमवाप। वेङ्गमाम्बां ग्रामस्थाःशापवाग्भिः पतिघातिनी जातेति किञ्चित्कालपर्यन्तं निन्दितां कृत्वा कालानन्तरं स्वकृतनिन्दया पश्चात्तप्ताः आसन्। सा वयोधिक विज्ञानवती भूत्वा पितरौ सान्त्वयित्वा तयोरपि वैराग्यभावं भगवद्भक्तिभावं च वर्धयामास।

सा धर्मानुसारिणी भक्तिमती वेङ्कटाचलपतिरेव स्वपतिरितिस्वकेशखण्डनपद्धतेः तिरस्कृतवती। अहं नित्यसुमङ्गलिनीति भगवान् मम पति देवः इति दृढनिर्णयं प्रकटीचकार।

(अनुवर्तते१७)



प्रतिबघ्नाति हिश्रेयः पूज्यपूजा व्यतिक्रमः।




- आचार्य जि.पद्मनाभम्, चरवाणी -९२४७३२८२८६

२०२५ आगस्टमासे नवमतिथौ विखनसमहामुनिजयन्ती निर्दिष्टम्।

**ब्रह्मणाविखनसमुनेः सृष्टिः -** ब्रह्मणः परिशुद्धन्तरात्मनि वेदान्तसारः एव मुनिरूपं धृत्वा ब्रह्मणः पुरतः साक्षात्कृतः। इच्छामात्रा प्रभोस्सृष्टिः। तं वेदरूपं मुनिं ब्रह्मा एवमवोचत् विशेषखननाज्ञातः तस्मात्त्वं विखना भव। विशेषालोचनात् जातत्वात् विखनः इति तस्य नामकरणं कृतम्। विशब्दः पक्षिणः परमात्मनश्चवाचकः खन नाम ब्रह्म विचारः। अतः विखनसो नाम ब्रह्मवित्, ब्रह्मवित् ब्रह्मैव भवति। निः बकासुरः तस्य हन्ता भगवान् विष्णुमूर्तिः स्वार्थे अणूप्रत्ययात् उभमपदवृद्धौ वैखानः इति निष्पन्नम्। वैखानस्सामगायनः'' (भारतम्) महाविष्णुः चतुराननः। तदुभयसंकल्प जातः महर्षिः च विखनशब्द वाच्याः। विखनसः ब्रह्ममानसपुत्रः इति घटिकाचलमाहात्म्ये तृतीयाश्वासे प्रोक्तम्। नारायणः वेदान्ततत्वार्थ खननञ्चाकार। वेदान्त सारशुद्धसत्त्वमययोगी जटामकुटभूषणः चतुर्भुजः शंखचक्र शिखायज्ञोपवीतोर्ध्वपुण्ड्रकमण्डलघटधारी सूर्यतेजस्कः मुनीन्द्रो भूत्वा उदूबभूव इति भृगुना प्रोक्तम्। श्रीहरिः स्वमनोजातौरसपुत्रमादरात् दृष्ट्वा विखनसः इति नामकरणञ्चकार। आत्मना आत्मानं खनित्वा-ज्ञानादिगुणैः ध्यानयोगेन विखनसं ससर्ज मरीथ्यत्रिकाश्यपैरेव एवमेव प्रोक्तम्। श्रीमहाविष्णुः ब्रह्मशरीरं प्रविश्य स्वाराधनयोग्यं महर्षिं ससर्जेति ज्ञायते। विष्णोरनुग्रहात् विष्णुरूपधरं विष्णुपूजाधुरन्धरं विखनसमहामुनिं ब्रह्मा ससर्जेति निश्चयार्थः। विशेषालोचनजातत्वात् विखनसः इति मुनीन्द्रस्य नामधेयं कृत्वा हरिपुरतः तं ब्रह्मा निवेशयामास। मङ्गलादिमाहात्म्यमनुसृत्य महालक्ष्म्या सह तस्य मुनीन्द्रस्य जातकर्माद्यष्टदश संस्कारान् कृत्वा वेदवेदार्थमुपदिश्यततस्तमुद्दिश्य हे विखनसमुने! त्वं मया नियमितः मामेवाराधय। तथाराधनात् मल्लोके एव निवसिष्यसि। यजुर्वेदमनुसृत्य प्रख्यातसूत्राणि विरचय। तत्सूत्र ग्रन्थः वैखानसमूत्रनाम्ना प्रसिद्धिमेष्यति। तव भृगुमरीच्यत्रिकश्यपाः भरद्वाजविश्वामित्रगौतम वसिष्ठजमदग्न्यादयः सप्तर्षयः तव शिष्याः भूत्वा त्वत्सूत्राण्यनुसृत्य सूत्रकर्तारः भविष्यत्रीत्यवोचत्।

**ब्रह्माण्डपुराणमनुसृत्यकथनम् -** हे मुनीन्द्र! विद्याविशारदाः अरुणकेतुवातरशनादिमुनीन्द्राः वर्तन्ते। त्वत्सूत्रोक्त विधानार्चनमेव मम सन्तोषदायकः अहमर्चारूपे भूलोके भारतवर्षे नदीनदवनपट्टणपर्वतादिषु अवतीर्य लोकेषु जायमान दुर्भिक्षानावृष्टिराजबाधाद्यरिष्टशमनं करिष्यामि। स्थानेषु देवालयेषु मत् स्थानेषु त्वत्सूत्रानुष्ठातृभिः एव मदर्चनं कर्तव्यम्। ते मदनुग्रहपात्राः लोकोपकारं कृत्वा मत्सायुज्यं प्राप्स्यन्ति इत्याज्ञां

ददौ। विखनसः एतानि अमृतप्रायकर्णानन्दजनकवाक्यानि श्रुत्वा नारायण चरणारविन्दयोः साष्टाङ्गदण्डप्रणामं कृत्वा श्रीहरिमेवमवोचत्। देव! त्वदाराधनरूप महाभारं

मयिनिक्षिप्तोऽसि। यथाविध्युक्ताचरणाय मम सामर्थ्यं नास्ति। द्रव्य वस्तुक्रियालोपापराधः मयि पतेदिति बिभेमि। मत्सत्रानुष्ठातृभिः ब्राह्मणैरेव अर्चनकार्यनिर्वहणं कर्तव्यमिति नियमं कृतोऽसि। तेभ्यः कथं भुक्तिमुक्तिश्रेयः प्राप्तिः भविष्यतीति प्रार्थयामि। सार्वकालिकाचनापरतत्राणां मुक्त्यर्थपर्यटनावश्यकं नास्ति। परन्तु तेषां मुक्त्यर्थं पर्यटनमावश्यकम्। तैः निजदारापुत्रादिपोषणार्थं किं कर्तव्यमिति वदन्तु इत्यपृच्छत्।

**विष्णुः विखनसाय वृत्त्यादिनिर्णयकरणम् -** तच्छ्रुत्वा विष्णुः हे विखनसमुने! ब्राह्मणश्रेष्ठानां त्वसूत्रानुष्ठातॄणां श्रुतिस्मृतीतिहासपुराणेषु मोक्षार्थं तिस्रः जीवनार्थं प्रसिद्धाः वृत्तयः प्रोक्ताः। १. यजनं, २. याजनं, ३. अध्ययनं ४. अध्यापनं, ५. दानं ६. प्रतिग्रहः इति षड्विधाः। अत्र यजन अध्यापन दानानि? मोक्षार्थाणि। याजनाध्यापन प्रतिग्रहाः जीवनार्थाः। यजनं मोक्षार्थं मदारधनम्, २.अध्ययनं वेदपारायणम् ३. दानं दानफलप्रदातुः मम समर्प्यमाण समस्तदानानि जीवनार्थवृत्तयः १. याजनम् - द्रव्यं स्वीकृत्य मदाराधनम् २. अध्यापनम् द्रव्यं स्वीकृत्य वेदादीनन्येभ्यः वोधनम्। ३. प्रतिग्रहः परैः दीयमानदानधर्मादीन् स्वयंवा अन्यद्वारा वा परिग्रहणम् एताः जीवनार्भवृत्तयः। अत्र अध्यापने वेदविक्रयदोषः धनप्रतिग्रहणे स्वार्जित श्रेयः क्षयदोषः वर्तते। द्वावपि परित्यज्य सकलश्रेयोभिवृद्धिदायकं भुक्तिमुक्तिप्रदायकं सर्वारिष्टशमनं सर्वपापनिवृत्तिकारकं मदीययाजकत्वं स्वीकुर्वन्तु। लोकगुरोः मम पूजाधिविधिना सन्तुष्टिर्जायते। पुण्यमपि न नश्यति। ब्राह्मणेभ्यः जीवनमपि स्यात्। अग्निः अर्चनं मम द्वेमुखे यज्ञादिक्रतुभिः होममाचर्य आगतं हविः अग्निमुखात् अन्नहविः अर्चामुखादहं भुजिष्यामि। अर्चनं होमः वेदविहितमहायज्ञे। एतेषु यज्ञेषु मदर्चकैः क्रियमाणहोमहविर्द्रव्यं मुकद्वयेन गृह्णामि। ब्राह्मणाः अध्वरदक्षिणाः गृहीत्वा जीविष्यन्ति। नित्यपूजाविदौ दक्षिणरीत्या द्रव्यं गृहीत्वा ब्राह्मणाः जीवन्तु। मासे सर्व अतिरात्रे यज्ञदक्षिणाः स्वीकुर्वन्तु। वर्षोत्सवे महापुण्यप्रदवाजपेययाग दक्षिणाः स्वीकृत्य जीवन्तु। मद्विग्रहप्रतिपठाने भूदेवी प्रतिष्ठाने अश्वमेधयोगे विध्युक्तदक्षिणां पूजाविधौ स्वीकुर्वन्तु। एवं सेर्वेषां ब्राह्मणानां जीवनोपाधिः भवेदिति उक्त्वा त्वद्रूपमेव मद्रूपम्। उभयोर्भेदोनास्ति त्वत्सूत्रानुष्ठातारः मदंश सम्भूताः इत्युपदिश्य हरिः अन्तर्दधौ।

**बदरीवनमाहात्म्यम् -** कण्वाश्रमात् नन्दगिरिपर्यन्तं व्याप्ते देवभूलोकमध्यस्थे नैमिशारण्ये एक भागबदरी वनं भगवदाज्ञां पुरस्कृत्य विखनसमुनीन्द्रः श्रीवैकुण्ठात् स्वायम्भुव मनोः काले शुक्लसंवत्सरश्रावणशुद्धपूर्णिमा, सोमवासरे श्रवणानक्षत्र सिंहलग्ने जातः इति प्रोक्तम्।

वैखानससूत्राणि विष्णुः स्वमानसपुत्राय विखनसमुनये बोधयामास। विखनसमुनिः स्वशिष्यभ्यः अत्रि भृगु मरीचि काश्यपेभ्यः बोधयामास। तद्दर्चनाः एव वैखानसागमाः इत्युच्यन्ते।

**कण्वाश्रम समारभ्य यावन्नन्दगिरिभवेत्**
**तावत्क्षेत्रवरं पुण्यं भुक्तिमुक्तिप्रदायकं।**
**ये तत्र वासिनोलोकाः बदर्याश्रममण्डले**
**विष्णुरूप धरास्सर्वे भवन्ति वरवर्णिनी।।**

ब्राह्मणः श्रावणमासे उपाकर्म आरभ्य नूतनं यज्ञेपवीतं धरन्ति। भृग्वत्रिकाश्यप मरीचिविरवन साचार्य महर्षीन् सन्मानयन्ति विखनसमहामूनिकृत महात्कार्याण्यधिकृत्य वैखानस संहितां अधिकृत्य उपन्यास चर्चा प्रसङ्गानि प्रवर्तयन्ति। वैखानससूत्रानुसारं देवालयपूजादिकार्याणि निर्वहन्ति ति.ति.देवस्थान तिरुमलास्थान मण्टपे गुरुवासरे विखनसमुनेः आस्थानं निर्वहति। वेदपण्डिताः विखनसमुनिं पूजयित्वा तन्महत्त्वं प्रशंसन्ति।

विखनससूत्राणि दैवदत्तानीति निरूपयितुं श्रीनिवासमुखः दशविधहेतूण निरुपयामास। दैवपूजा मानसी, होम, बेरपूजेतित्रिविधा। १. मानसीपूजा - ध्यानमथन द्वारा इष्टदैवं हृदये मूर्तिमत्कृत्वा ऊहामात्रेण पूजादिकनिर्वर्तनं मानसिक पूजा २. होमपूजा - ज्वलदग्नै। भगवन्तं मूर्तिमत्कृत्वा अग्निहोत्रनिर्वहणम्। अर्थात् भगवन्तं अग्निमयत्वेन आराधनं होमपूजा भवति। ३. बेरपूजा - प्रतिष्ठितप्रतिमायाः पूजा बेरपूजा। पूजाविधानेष्वियमुत्तमपूजा यतः सुन्दरप्रतिमा मनः आकर्षति, हृदयोल्लासं भक्तिं जनयति। वैष्णवाः विष्णुबलिः इति संस्कारद्वारा जन्मतः वैष्णवाः भवन्ति। गर्बवैष्णवानां जननादेव अर्चकाहतां प्राप्नुवन्ति। अर्चनार्हतायै निषेकाद्यष्टादशसंस्कारत्वं आगमविज्ञानं धर्माचरणं प्रधानम्।

# सिद्धिविनायकव्रतकल्पः



आदौ कुङ्कुमतिलकं धृत्वा नमस्कृत्य एवं प्रार्थना कर्तव्या।

प्रार्थना - ओं शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।।
अयं मुहूर्तः सुमुहूर्तोऽस्तु।।
श्लो।। तदेवलग्नं सुदिनं तदेवताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव, लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।।
श्लो।। लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः।।
आपदामपहर्तारं दातारं सर्वसम्पदां।
लोकाभिरामं श्रीरामं भूयो भूयो नमोम्यहम्।।
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्नराजोगणाधिपः।।
धूमकेतुर्गणाध्यक्षः फालचन्द्रो गजाननः।
वक्रतुण्डश्शर्पकर्णो हेरम्ब स्कन्दपूर्वजः।।
अष्टावष्टौ च नामानि यः पठेच्छृणुयादपि
संग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते।
विद्यारम्भे विवाहे च प्रवेशे निर्गमेतथा
अभीप्सितार्थ सिद्ध्यर्थं पूजितो यस्सुरैरपि
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः।।

आचमनं - नमस्कृत्य आचमनं कर्तव्यम्। वामहस्तेन उद्धरिणीं धृत्वा जलपात्रं निवेश्य वारत्रयं जलं दक्षिणहस्ते पातयन् ''ओं केशावय स्वाहा ओं नारायणाय स्वाहा, ओं माधवाय स्वाहा इति वदन् शद्बेन विना अधरेण जलं पेयम्।''

हस्तं प्रक्षल्य उद्धरिण्या जलं आदाय हस्तं प्रक्षालनीयम्।

पूजासन्नाहः - विनायकचतुर्थीदिने गृहं शुभ्रं कृत्वा आम्रपत्र तोरणं कम्बनीयम्। द्वारबन्धः अलङ्करणीयः। कुटुम्बसभ्यैः सर्वैरपि शिरः स्नानं कर्तव्यम्। दैवशालायां तत्र परिशुभ्रप्रदेशे एकं पीठं निधाय तत्र विनायकविग्रहः निवेशनीयः। पूजासामग्री अपि संसिद्धा भवितव्या। विनायकस्य अन्ड्राल्ल बह्वभिमतम्। अन्यभक्ष्याभावेऽपि ''उण्ड्राल्लु'' भक्ष्यविशेषः अवश्यं भवितव्यानि। विनायकविग्रहपुरतः पीठे ताण्डुलानि निवेश्य तत्र ताम्रअथवा रजत - अथवा मृत्पात्रं निवेशनीयम् तस्य हरिद्रालेपनं कृत्वा तिलकधारणं कर्तव्यम्। तत्र अक्षताः, पुष्पाणि च निवेश्य आम्रपत्राणि च निवेश्य, ततः नारिकेल फलेन सह कलश निवेशनीयः। पश्चात् हरिद्राचूर्णेन हरिद्रागणपतिः निर्मेयः। पूजायाः पूर्वं पात्रे उद्धरिणीं निवेश्य पार्श्वे अन्य स्थालं निवेशनीया पूजासमये हस्तस्य हरिद्रकुङ्कुम स्पर्शः भवेत् अतः हस्तस्य अघः एकं शुभ्रं वस्त्रं निवेशनीयम्।

ओं गोविन्दाय नमः इत्युच्चरन् उद्धरिण्या जलं दक्षिणहस्ते पातयन् तज्जलं अन्य पात्रे पातनीयम्। आचमनजलं पूजायां नोपयोज्यम्। पश्चात् हस्तौ प्रक्षाल्य नमस्कृत्य विष्णे नमः ओं मधुसूदनाय नमः त्रिविक्रमाय नमः वामनाय नमः, श्रीधराय नमः, हृषीकेशाय नमः, ओं पद्मनाभाय नमः ओं दामोदराय नमः, ओं सङ्कर्षणाय नमः, ओं वासुदेवाय नमः, ओं प्रद्युम्नाय नमः, ओं अनिरुद्धाय नमः, ओं पुरुषोत्तमाय नमः, ओं अधोक्षजाय नमः, ओं नारसिंहाय नमः ओं अच्यताय नमः, ओं जनार्दनाय नमः ओं उपेन्द्राय नमः, ओं हरये नमः, ओं श्रीकृष्णाय नमः इति वक्तव्यम् पश्चात् -

भूतोच्चाटनम् -
श्लो।। उत्तिष्टन्तु भूतपिशाचाः येतेभूमिभारकाः।
एतेषामविरोधेन ब्रह्मकर्म समारभे।।

इत्युक्त्वा उद्धरिण्या जलं स्वीकृत्य दक्षिणहस्ते पातयित्वा तज्जलं चतुःकोणेषु विकिरणं कर्तव्यम्।

प्राणायामः - ओं भूर्भुवस्सुवः गायत्रीछन्दः प्राणायामे विनियोगः (प्राणायामः कर्तव्यः नासिकावामरन्धात् वायुं स्वीकृत्य गयत्रीमन्त्रः उच्चरणीयः)
ओं भूः, ओं भुवः, ओं सुवः ओं महः,
ओं जनः, ओं तपः, ओगूम् सत्यं ओं तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।
ओमापो ज्योती रसोऽमृतम् ब्रह्म भूर्भुवस्सुवरोम्

एवं वारत्रयं प्राणायामः कर्तव्यः (दीपाराधनं कृत्वा एवं संकल्पः कर्तव्यः) संकल्पः = ओं ममोपात्तसमस्त दुरितक्षयद्वारा श्रीपरमेश्वरं उद्दिश्य प्रीत्यर्थं शुभेशोभने मुहूर्ते आद्यब्रह्मणः द्वितीयपरार्धेश्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशति तमे, कलियुगे प्रथमपादे जम्बूद्वीपे भरतवर्षे, भरतखण्डे मेरोर्दक्षिण भागे श्रीशैलस्य ... प्रदेशे (श्रीशैलस्य यस्मिन् शिवसामः सा दिक्वक्तव्या) अस्मिन् वर्तमाने व्यावहारिकचान्द्रमानेनप्रभवादि पष्टिसंवत्सराणां मध्ये श्रीविश्वासुनामसंवत्सरे दक्षिणायने वर्षर्तौ, भाद्रपदमासे शुक्लपक्षे चतुर्थ्यां तिथौ सौम्यवासरे युक्तायां शुभनक्षत्रे शुभयोगे शुभकरणे अस्यां एवं गुण विशेषण विशिष्टायां, शुभतिथौ श्रीमान्... गोत्रः ...नामधेय श्रीमतः...गोत्रस्य ...नामधेयस्य (पूजार्थं उपविष्टबालबालिकानामपि वक्तव्यम्) धर्मपत्नी समेतस्य अस्माकं सह कुटुम्बानां क्षेमस्थैर्य विजयायुरारोग्यैश्वर्याबिवृद्ध्यर्थं इष्टकाम्यार्थसिद्ध्यर्थं मनोवाश्च फलसिद्ध्यर्थं समस्त दुखोपशान्त्यर्थं समस्तमङ्गलावाहयर्थं वर्षे वर्षे प्रयुक्तश्रीवरशिद्धि विनायकचतुर्थीमुद्दिश्य श्रीवरशिद्धिविनायकदेवता प्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादिषोडशोपचार विधानेन वरसिद्धिविनायकपूजां करिष्ये। (एवमुच्चरन् दक्षिणहस्तमध्याङ्गुल्या जलं स्वीकरणीयम्) आदौनिर्विघ्नेन परिसमाप्त्यर्थं

श्रीगणाधिपतिपूजां करिष्ये। तदङ्गकलशपूजां करिष्ये।

कलशपूजा - कलशं गन्धपुष्पाक्षतैरभ्यर्थ्य। तस्योपरि हस्तं निधाय (कलशस्थाने हरिद्राकुअहकुमाः निक्षिप्य तस्मिन् जलकलशं संस्थाप्य तस्य कलशस्य गनधाक्षताः निक्षिप्य तत्र तुलसीपत्रपुष्पाणि प्रकीर्थ दक्षिणहस्तः कलशोपरि निवेशनीयः।

पश्चात् - कलशस्य मुखे विष्णुः कण्टेरुद्रस्समाश्रितः।
मूले तत्र स्थितो ब्रह्मा, मध्ये मातृगणाः स्थिताः।।
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसन्धरा।
ऋग्वेदोथ यजुर्वेदस्समवेदोह्यथर्वणः।।
अङ्गश्चै सहितास्सर्वे कलशाम्बुसमाश्रिताः।
आयान्तु देवपूजार्थं दुरित क्षयकारकाः।।
(श्लोकमिमं पठन् पत्र जलेसव्य पद्धत्यां भ्रमाणीयम्)
ओं गङ्गे च यमुने कृष्णे गोदावरि सरस्वति
नर्मदे सिन्धुकावेरी जलेऽस्मिन् सन्निधिंकुरु
कलशोदकेन पूजाद्रव्याणि देवमात्मानं च संप्रोक्ष्य।

नागवल्लीपत्रेण कलशजलं पूजाद्रव्योपरि दैवोपरि विकीर्य आत्मव्यपि विकीर्यम् पटश्चात् हरिद्रागण पतिः पूज्यः।

महागणपतिपूजा - गणानां त्वां गणपतिगुंहवामह
कविं कवीनामुपमश्रावः स्तवम्
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत्यः
अनश्रृण्वन्नूतिभिस्सीद साधनम्।।

श्रीमहागणाधिपतये नमः।। ध्यनावहनादि षोडशोपचारपूजां करिष्ये(मध्याङ्गुल्या जलस्पर्शः कर्तव्यः।

ध्यानम् - ओं शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भजं
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।।

इति श्लोकं पठन् पुष्पाक्षताः मिश्रीकृत्य हरिद्रागणपतिपादयेः निक्षेपनीयम्। पूजादेवपादसमीपे एव कर्तव्या। शिरसि पुष्पक्षताः न विकीर्याः।

श्रीमहागणपतिं ध्यायामि ध्यानं समर्पयामि, आसनं समर्पयामि ओं महागणपतिं आवाहयामि (पुष्पाणि अक्षताः समर्प्य नमस्कर्तव्यः। पश्चात् (उद्धरिण्या जलं दर्शयित्वा अध्यपात्रे पातयन्) पादयोः पाद्यं समर्पयामि, हस्तयोः अर्घ्यं समर्पयामि, मुखे शुद्धाचमनीयं समर्पयामि। एवं कथयन् उद्धरिण्या जलं हरिद्रागणपतेः दर्शयित्वा तज्जलं स्थाले पातनीयम्। हरिद्रागणपतिं गन्धाक्षतहरिद्राकुङ्कुमपुष्पैः पूजनीयम्। अगरुवर्तिकाः ज्वालयित्वा गुडेन वा फलैर्वा नैवेद्यं समर्प्य षोडशोपचारपूजा कर्तव्या।

यथाभागं गुडं निवेदयामि। श्रीमहागणाधिपतिस्सुप्रसन्नो सुप्रीतो वरदो भवतु। श्रीमहागणाधिपतिप्रसादं शिरसा गृहामि (एवं वदन् पूजासमर्पित अक्षताः स्वीकृत्य शिरसि धारणीयम्। श्रीमहागणाधिपतये नमः, यथा स्थानं प्रवेशयामि शोभनार्थे क्षेमाय पुनरागमनाय च एवं वदन् हरिद्रागणपतिं किञ्चित् प्राग्दिङ्खं निक्षिप्य अक्षताः विकीर्य नमस्कारः कर्तव्यः। पुनराचमनंकृत्वा सूचनानुसारं संकल्पः वक्तव्यः।

अथश्रीवर सिद्धिविनायकपूजां करिष्ये। तदङ्गप्राणप्रतिष्ठापनं करिष्ये इति वदन् दक्षिणहस्तमध्याङ्गुल्या जलस्पर्शः कर्तव्यः।

श्रीवरसिद्धिविनायकप्राणप्रतिष्ठा-

(विग्रहोपरि पुष्पेण किञ्चित्पञ्चामृतं विकीर्य)

ओं आं ह्रीं यं रं, लं, वं, शं षं , सं, हं, इत्याद्येन प्राणप्रतिष्ठापनं कृत्वा नमस्कृत्य (नमस्कारं कुर्वन्) ओं वरसिद्धिविनायकाय नमः

श्लो।। स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकं
तावत्त्वं प्रीतिभावेन बिम्बेऽस्मिन् सन्निधिं कुरु।।

आवाहितो भव, स्थापितो भव, सुप्रसन्नोभव,अवकुण्टितो भव स्थिरासनं कुरु प्रसीद प्रसीद, प्रसीद इति वदन् विनायक विग्रहपादसमीपे अक्षताः पुष्पाणि समर्प्य नमस्कर्तव्यः।

षोडशोपचारपूजा : - भवसंचितेपापौघ विध्वंसन विलक्षमम्।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे।।
एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भजम्।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धि विनायकम्।।
उत्तमं गजनाथस्य व्रतं सम्पत्करं शुभम्।
भक्ताभीष्टप्रदं तस्मात् ध्यायेत्तं विघ्ननाथकम्।।
ध्यायेद्गजाननंदेवं तप्तकाञ्चनसन्निभम्।
चतुर्भजं महाकायं सर्वाभरण भूषितम्।।
श्रीवरसिद्धि विनायकस्वामिने नमः।
(विनायक विग्रहपादसमीपे पुष्पाणि अक्षताः समर्प्य नमः कर्तव्यम्।

आवाहनम् : अत्रागच्छ जगद्वन्द्य सुरराजार्चितेश्वर।
अनाधनाथ सर्वज्ञ गौरीगर्भ समुद्भव।।
श्रीवरसिद्धिविनायकस्वामिने नमः आवाहयामिः
(पुनः अक्षताः समर्पणीयाः)

आसनम् - मौक्तिकैः पुष्परागैश्च नानारत्नैर्विराजितम्।
रत्नसिंहासनं चारु प्रीत्यर्थं प्रतिगृहयताम्।।
(आसनं समर्पयामि, अक्षताः अथवा पुष्पाणि समर्पणीयामि)

अर्घ्यम् - गौरीपुत्र नमस्तेस्तु शङ्करप्रियनन्दन।
गृहाणार्घ्यं मयादत्तं गन्धपुष्पाक्षतैर्युतम्।।
अर्घ्यम् समर्पयामि (उद्धरिण्या जलं स्वामिने दर्शयित्वा पाश्वस्थ पात्रे पातनीयम्)

पाद्यम् : - गजनवक्त्र नमस्तेस्तु सर्वाभीष्टप्रदायक।
भक्त्यापाद्यं मयादत्तं गृहाणद्विर्गजानन।।
पाद्यं समर्पयामि (पुनः किञ्चित् जलं स्वीकृत्य स्वामिने दर्शयित्वा स्वामिपादमूले निक्षेप्यम्)

आचमनीयम् : - अनाथनाय सर्वज्ञ गीर्वाणगणपूजित।
गृहाणाचमनं देव तुभ्यं दत्तं मया प्रभो।।
आचमनीयं समप्यामि (किञ्चित् जलं स्वीकृत्य स्वामिने दर्शयित्वा पात्रे पातनीयम्)

मधुपर्कम् : - दधिक्षीरसमायुक्तं मध्वाज्येन समन्वितम्।
मधुपर्कं गृहाणेदं गजवक्त्र नमोस्तुते।।
मधुपर्कं समर्पयामि (स्वामिने मधुपर्कं समर्पणीयम्)

पञ्चामृतस्नानम् : - ओं स्नानं
पञ्चामृतैर्देव गृहाणगणनायक।
अनाथनाथ सर्वज्ञ गीर्वाणगणपूजित।।
पञ्चामृतस्नानं समर्पयामि।। (गोक्षीरं, दधिधृतं शर्करा मधुमिश्रितं एकेन पुष्पेण स्पृष्ट्वा स्वामिविग्रहोपरि विकीर्यम्)

शुद्धोदकस्नानम् - ओं गङ्गादि सर्वतीर्थेभ्यः आहृतैरमलैर्जलैः।
स्नानं कुरुष्व भगवन्नुमपुत्र नमोस्तुते।।
शुद्धोदक स्नानं समर्पयामि। (कलशस्य जलेन स्नानम्)

वस्त्रम् : - ओं रक्तवस्त्रद्वयं चारु देवयोग्यं च मङ्गलम्।
शुभप्रदं गृहाणत्वं लम्बोदर हरात्मज।।
वस्त्रयुग्मं समर्पयामि (स्वामिने वस्त्राणि अथवा गृहे पूजाचरणे तोले हरिद्र कुङ्कुम लेपनं कृत्वा तत् वस्त्रत्वेन समर्पणीयम्।

यज्ञोपवीतम् : - राजितं ब्रह्मसूत्रं च काञ्चनंचोत्तरीयकम्।
गृहाणदेव सर्वदज्ञ भक्तानामिष्टदायक।।
यज्ञोपवीतं समर्पयामि। यज्ञोपवीतं समर्पणीयम्।

गन्धः -
ओं चन्दनागरुकर्पूरकस्तूरीकुङ्कुमान्वितम्।
विलेपनं सुरश्रेष्ठ प्रीतत्यर्थं प्रतिगृह्यताम्।।
दिव्यपरिमल गन्धं समर्पयामि। (किञ्चित् गन्धं स्वीकृत्य स्वामिनने अलङ्कर्तव्यम्।

अक्षताः - अक्षतान् धवलान् दिव्यान् शीलायान् तण्डुलान् शुभान्।
शुभान् गृहाण परमानन्द शम्भुपुत्र नमोऽस्तुते।।
अक्षतान् समर्पयामि(स्वामिने अक्षताः समर्पणीयाः।।

पत्रपुष्पाणि - सुगन्धानि च पुष्पाणि जाजीकुन्द मुखानि च।
एकविंशतिपत्राणि संगृहण मनोऽस्तुते।।
पुष्पैः पूजयामि (स्वामिनं पुष्पैःपत्रैः पूज्यम्)

अथ अङ्गपूजा - एकेन नाम पठनं अन्यैः अक्षतपूज कर्तव्या)
ओं गणेशाय नमः, पादौ पूजयामि (स्वामिपादोपरि अक्षताः समर्पणीयाः।

(अनन्तरपुटे पश्यन्तु)

## श्रीविनायक अष्टोत्तरशतनामावाळिः

पश्चात् श्रीविनायकाष्टोत्तर शतनामानि पठन् स्वामिनः पूजा अक्षतैर्वा पुष्पैर्वा कर्तव्यम्। एकेन नाम पठनं अन्यैः ओ मित्युच्चरणेन सह पूजा कर्तव्या।

ओं गजाननाय नमः
ओं गजाध्यक्षाय नमः
ओं विघ्नराराजाय नमः
ओं विनायकाय नमः
ओं द्वैमातुराय नमः
ओं द्विमुखाय नमः
ओं प्रमुखाय नमः
ओं सुमुखाय नमः
ओं कृतिने नमः
ओं सुप्रदीपाय नमः 10
ओं सुखनिधये नमः
ओं सुराध्यक्षाय नमः
ओं सुरारिघ्नाय नमः
ओं महागणपतये नमः
ओं मान्याय नमः
ओं महाकालाय नमः
ओं महाबलाय नमः
ओं हेरम्बाय नमः
ओं लम्बजठराय नमः
ओं ह्रस्वग्रीवाय नमः 20
ओं महोदराय नमः
ओं मदोत्कटाय नमः
ओं महावीराय नमः
ओं मन्त्रिणे नमः
ओं मङ्गलस्वराय नमः
ओं प्रमथाय नमः
ओं प्रथमाय नमः
ओं प्राज्ञाय नमः
ओं विघ्नकर्त्रे नमः
ओं विघ्नहन्त्रे नमः 30
ओं विश्वनेत्रे नमः
ओं विराटपतये नमः
ओं पतये नमः
ओं वाक्पतये नमः
ओं श्रृङ्गारिणे नमः
ओं आश्रितवत्सलाय नमः
ओं शिवप्रियाय नमः
ओं प्रमुखाय नमः
ओं शीघ्रकरिणे नमः
ओं बलाय नमः 40
ओं बलोत्थिाय नमः
ओं भवात्मजाय नमः
ओं पुरणपुरुषाय नमः
ओं पूष्णे नमः
ओं पुष्परोक्षिप्तवारिणे नमः
ओं अग्रगण्याय नमः
ओं अग्रपूज्याय नमः
ओं अग्रगामिने नमः
ओं मन्त्रकृते नमः
ओं चामीकरप्रभाय नमः 50
ओं सर्वस्मै नमः
ओं स्वोपास्याय नमः
ओं सर्वकर्त्रे नमः
ओं सर्वनेत्रे नमः
ओं सर्वसिद्धिप्रदाय नमः
ओं सर्वसिद्धये नमः
ओं पञ्चहस्ताय नमः
ओं पार्वतीनन्दनाय नमः
ओं प्रभवे नमः
ओं कुमारगुरवे नमः 60
ओं अक्षोभ्याय नमः
ओं कुञ्जरासुभञ्जनाय नमः
ओं प्रमोदोत्थानाननाय नमः
ओं मोदकप्रियाय नमः
ओं कान्तिमते नमः
ओं धृतिमते नमः
ओं कामिने नमः
ओं कपित्थवनप्रियाय नमः
ओं ब्रह्मचारिणे नमः
ओं ब्रह्मरूपिणे नमः 70
ओं ब्रह्मविद्यादिदानभुवे नमः
ओं जिष्णवे नमः
ओं विष्णुप्रियाय नमः
ओं भक्तजीविताय नमः
ओं जितमन्मथाय नमः
ओं ऐश्वर्यकारणाय नमः
ओं ज्यायसे नमः
ओं यक्षकिन्नरसेविताय नमः
ओं गङ्गासुताय नमः
ओं गणाधीशाय नमः 80
ओं गम्भीरनिदाय नमः
ओं वटवे नमः
ओं अभीष्टवरदाय नमः
ओं ज्योतिष नमः
ओं भक्तनिधये नमः
ओं भावगम्याय नमः
ओं मङ्गलप्रदाय नमः
ओं अव्यक्ताय नमः
ओं अप्राकृतपराक्रमाय नमः
ओं सत्यधर्मिणे नमः 90
ओं सखये नमः
ओं सरसाम्बुनिधये नमः
ओं महेशाय नमः
ओं दिव्याङ्गाय नमः
ओं मणिकिङ्किणीमेखलाय नमः
ओं समस्तदेवतामूर्तये नमः
ओं सहिष्णवे नमः
ओं सततोत्थिताय नमः
ओं विघातकारिणे नमः
ओं विश्वदृशे नमः 100
ओं विश्वरक्षाकृते नमः
ओं कल्याणगुरवे नमः
ओं उन्मत्तवेषाय नमः
ओं अपराजिते नमः
ओं समस्तजगदाधाराय नमः
ओं सर्वैश्वर्यप्रदाय नमः
ओं आक्रान्तचिदचित्प्रभवे नमः
ओं विघ्नेश्वराय नमः 108

ओं एकदन्ताय नमः गुल्फौ पूजयामि
ओं शूर्पकर्णाय नमः जानुनी पूजयामि...
ओं आखुवाहनाय नमः ऊरु पूजयामि
ओं हेरम्बाय नमः, कटिं पूजयामि
ओं लम्बोदराय नमः उदरं पूजयामि
ओं गणनायाय नमः, नाभिं पूजयामि
ओं गणेशाय नमः हृदयं पूजयामि
ओं स्थूलण्ठाय नमः, कण्ठं पूजयामि
ओं स्कन्धग्रजाय नमः स्कन्धौ पूजयामि
ओं पाशहस्ताय नमः, हस्तौ पूजायामि
ओं गजवक्त्राय नमः, वक्तं पूजयामि
ओं विघ्नहन्त्रे नमः नेत्रे पूजयामि
ओं शूर्पकर्णाय नमः कर्णौ पूजयामि
ओं फलचन्द्राय नमः ललाटं पूजायामि
ओं विघ्नेश्वराय नमः शिरः पूजयामि
ओं विघ्नराजाय नमः, सर्वाण्यङ्गानि पूजयामि।।

एवमुक्त्वा अञ्जलिना पुष्पाणि स्वीकृत्य विनायकस्य शिरः आरभ्य पादपर्यन्तं पातनीयानि।

एकविंशतिपत्रपूजा -

एकैकं नाम पठन् पत्राणि स्वीकृत्य स्वामिने समर्पणीयम्

ओं सुमुखाय नमः माचीपत्रं पूजयामि
ओं गणादिपाय नमः बृहतीपत्रं पूजायामि
ओं उमापुत्राय नमः बिल्वपत्रं पूजयामि
ओं गजाननाय नमः दूर्वायुग्मं पूजायामि
ओं हरसूनवे नमः दूतूरपत्रं पूजयामि
ओं लम्बोदराय नमः बदरी पत्रं पूजयामि
ओं गुहाग्रजाय नमः, अपामार्ग पत्रं पूजायामि
ओं गजकर्णाय नमः तुलसी पत्रं पूजयामि
ओं एकदन्ताय नमः चूतपत्रं पूजयामि
ओं विकटाय नमः करवीरपत्रं पूजयामि
ओं भिन्नदत्ताय नमः, विष्णुक्रान्तपत्रं पूजयामि
ओं वटवे नमः दाडिमी पत्रं पूजयामि
ओं सर्वेश्वराय नमः देवदारुपत्रं पूजयामि
ओं फलचन्द्राय नमः मरुवकपत्रं पूजयामि
ओं हेरम्बाय नमः सिन्धुवारपत्रं पूजयामि
ओं शूर्पकर्णाय नमः जाजीपत्रं पूजयामि
ओं सुराग्रजाय नमः गण्डकीपत्रं पूजयामि
ओं इभवक्राय नमः शमीपत्रं पूजयामि
ओं विनायकाय नमः अश्वत्यपत्रं पूजयामि
ओं सुरसेविताय नमः अर्जुन पत्रं पूजयामि
ओं कपिलाय नमः अर्कपत्रं पूजयामि
ओं श्रीगणेश्वराय नमः एकविंशति पत्राणि पूजयामि

ओं वरसिद्धिविनायक स्वामिने नमः। अष्टोत्तरशतनाम पुष्पपूजां समर्पयामि अक्षताः पुष्पाणि स्वामिपादमूले निवेशनीयानि

धूपः -

श्लो।। दशाङ्गं गुग्गुलोपेतं सुगन्धं समनोहरं।
उपासुतनमस्तुभ्यं गृहाण वरदो भव ।।
दिव्यपरिमलधूपमाघ्रापयामि....

(अगरुवर्तिकां ज्वालयित्वा तं धूपं स्वामिने दर्शयित्वा पार्श्वस्थकदली फलोपरि निवेशनीयम्)

दीपः - साज्यं त्रिवर्तिसंयुक्तं वह्निना द्योतितं मया गृहाण मङ्गलं दीपं ईशपुत्र नमोऽस्तुते।

दीपं दर्शयामि दीपः स्वामिने दर्शनीयः।

नैवेद्यम् - नारिकेलफलानि शिष्टानि चेत् एकैकशः खण्डीकृत्य नैवेद्यरूपेण समर्पणीयम्। इतः पूर्वं स्नानसमये खण्डितनारिकेल फलं चूर्णपाचकानि, पानकं कुडुमुलु, उड्राल्लु पुलिहोर अन्यभक्ष्यानि कदली फलादीनि स्वमिपुरतः निवेशनीयानि।

सुगन्धान् सुकृतांश्चैव मोदकान् घृतपायितान्
नैवेद्यं गृह्यता देव चरणमुदैः प्रकल्पितान्।।
भक्ष्यं भोज्यञ्च लेह्यञ्च चोष्यं पानीयमेव च
इदं गृहाण नैवेद्यं मयादत्तं विनायका।

महा नैवेद्यं समर्पयामि ... इति वदन् पत्रेण पदाथोऽपरि जलं प्रकीर्यम्। पश्चात् स्वामिने नैवेद्यं देयम्।

ताम्बूलम् - पूगीफलसमायुक्तं नागवल्ली दलैर्युतम्।
कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्।।

ताम्बूलं समर्पयामि... नागवल्ली पत्राणि तत्फलं, कदली दक्षिणविशिष्टताम्बूलं विनायकविग्रह पुरतः निवेश्य नमस्कारः कर्तव्यः।

पुष्पम् - सच्चिदानन्दविघ्नेश पुष्कलानि धनानि च ।
भूम्यां स्थितानि भगवन् स्वीकुष्व विनायका।।
सुवर्णमन्त्रपुष्पं समर्पयामि...

नीराजनम् - घृततर्तिसहस्रैश्च कर्पूरशकलैस्त चा।
नीराजनं मया दत्तं गृहाण वरदोभव।।
नीराजनं समर्पयामि...

कर्पूरं प्रज्वाल्य स्वामिने नीराजनं दत्वा पश्चात् नीराजन स्थाले जलं निवेश्य नयनस्पर्शः कर्तव्यः।

मन्त्रपुष्पम् - पुष्पाणि अक्षतांश्च स्वीकृत्य श्लोकाः एते पठितव्याः -

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः।।
धूमकेतुर्गणाध्यक्षो फालचन्द्रो गजाननः
वक्रतुण्डमहाकाय कोटिसूर्यसमप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा

प्रदक्षिणम् - यानि कानि च पापानि जन्मान्तरकृतानि च।
तान्येतानि प्रणश्यन्ति प्रदक्षिण पदे पदे।।
पापोऽहं पापकर्मोऽहं पापात्मा पापसम्भवः
पाहिमां कृपया देव शरणागतवत्सल
अन्यथा शरणं नास्ति त्वमेव शरणं मम।।
तस्मात्कारुण्य भावेन रक्षरक्ष गणाधिप।।
आत्मप्रदक्षिणनमस्कारान् समर्पयामि।

(प्रदक्षिणं कृत्वा नमः कर्तव्यम्।

साष्टाङ्गप्रणामः संप्रदायः) पश्चात् पुनरुपविश्य अक्षताः हस्तेन गृहीत्वा किञ्चिफलं अक्षतासु प्रसार्य एते श्लोकाः वक्तव्याः।

क्षमाप्रार्थना : -

यस्य स्मृत्याच नामोक्त्या तपः पूजाक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तं गणाधिपम्।
मन्त्रहीनं क्रियाहीनं शक्तिहीनं महाप्रभो
यत्पूजितं मया देव परिपूर्णं तदस्तुते।।

अनया ध्यानावाहनादि षोडशोपचार पूजया च, भगवान् सर्वात्मकः सर्वं श्रीमहागणाधिपतिदेवतार्पणमस्तु। श्रीमहागणाधिपतिः देवता सुप्रीतः सुप्रसन्नो वरदो भवतु इति वदन् अक्षताः जले स्याले पातनीयम्।



# विनायकव्रतकथा

**उद्यापनम् -**

**यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् तेह नाकं महिमानः सचन्ते यत्र पूर्वे साध्यास्सन्ति देवाः।।**

**श्रीमहागणादिपतये नमः। यथा स्थानं प्रवेशयामि... शोभवार्थं पुनरागमनाच** इति मन्त्रं पठन् विघ्नाधिपतिं ईशान्यदिङ्मुखं चालयित्वा स्वामिने उद्यापनं वक्तव्यम्।

(नित्यपूजां कृत्वा चतुर्थीतः ३,५,७,९,११ दिनेषु निमज्ञनकारिभिः तद्दिने इमं मन्त्रं पटित्वा उद्यापनं वक्तव्यम्।

**अकालमृत्युहरणं सर्वव्याधिनिवारणं समस्त पापक्षयकरं श्रीमहागणपति पादोदकं पावनं शुभम्**

इति वदन् पञ्चामृतानि नरिकेलजलञ्च मिश्रीकृत्य तीर्थवत् स्वीकरणीयम्। पश्चात् पूजाक्षतान् बालबालिकाशिरस्सु प्रकीर्णानि कर्तव्यानि अन्यैरपि एताः अक्षताः शिरसि धारणीयाः

**सर्वे जनास्सुखिनो भवन्तु**

**ओं शान्तिः शान्तिः शान्तिः** एवं पूजानन्तरं विनायकव्रत कथा पठनीया श्रोतव्या च।

**विनयकव्रतकथा -** इमां कथां शनैः उच्चैः सर्वावगमकतया पुरोहितेन पठनीयः। कथानन्तरं नारिकेल फलं भिवा विनायकाय नैवेद्यं समर्प्य कर्पूरनीराजनं समर्पणीयम्

**विनायकव्रतकथा -**

**मूख्यसूचना -** कथा कथनात्पूर्वं भक्तेभ्यः सर्वेभ्यः पुष्पाणि अक्षताः समर्प्यकथासमाप्तिपर्यन्तं भद्रतया स्थाप्यानीयमित्युक्तवा कथानन्तरं विनायकपादयोः निक्षिप्य नमस्कर्तव्यः इति वक्तव्यम्

१. ओं गुरुर्बह्मा गुरुविष्णुः गुरुदेवो महेश्वरः।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवेनमः।।

२. ओं शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।।

३. ओं सरस्वति, नमस्तुभ्यं वरदे कामरूपिणी।
विद्यारम्भं करिष्यामि सिद्धिर्भवतुमे सदा।।

पुरा चन्द्रवंशे धर्मराजो नाम प्रसिद्धः महाराजः आसीत् सः दैवबलाननुकूल्सात् सोदरकारणात् नष्टराज्यपालनाधिकारः भार्यासौदरैः सह अरण्यं जगाम। अट्यां ब्रह्मज्ञानोपतान् तपः आचरतः महर्षीन् ददर्श। ततस्तेभ्यः नमस्कृत्य समीपस्थ सूतमहामुनेः आश्रमं जगाम। तत्र तस्मै नमस्कृत्य तदनुमत्या उपविश्य ततः तमेवमपृच्छत् - हे महात्मन्! अस्माकं सोदराः मायाद्यते अस्मान् पराजित्य अस्माद्राज्यं स्वीकृत्य अस्मान् द्रोपदीञ्च अत्यन्तं बाधयामासुः। अस्माकं महद्दुःखकारकाः आसन्। अदृष्टवशात् भवद्दर्शनभाग्यं जातम्। अस्माकं दुःखं भवद्दर्शनात्परास्तमिति विश्वसिमः। करुणाया पुनः अस्माकं राज्यप्राप्तये युक्तं व्रतमुपदिशन्तु इति प्रार्थयामासुः। तदा सः सूतमहामुनिः पाण्डवानुद्दिश्य श्रुण्वन्तु। सर्वव्रतेभ्यः उत्तममेकं व्रतं वर्तते। तद्व्रतं सर्वमानवेभ्यः सम्पद्भोगभाग्यसुखानि दास्यति। सर्वपापानि नाशयित्वा वंशाभिवृद्धिं करिष्यति। पुराव्रतमिदं परमशिवः स्वपुत्राय कुमारस्वमिने उपदिदेश। तत्सर्वं श्रुण्वन्तु। कदाचित्कैलसे परमेश्वरं दृष्ट्वा नमस्कृत्य कुमारस्वामी एवमपृच्छत्। स्वामिन् मानवाः कस्य व्रतस्याचरणत् सम्पत्सन्तानवंश भिवृद्धिधनधान्यप्राप्तिसुखानि प्राप्स्यन्ति। दयया अनुगृह्य कथत इति प्रार्थयामास तदा सदा शिवः सन्तुष्टः कुमारं सम्बुद्धय कुमार! सर्वकामफलप्रदमहाव्रतं वर्तते। भाद्रपदशुक्लचतुर्थ्यां भक्तिश्रद्धाभ्यामिदं व्रतमाचरणीयमिति।

व्रतमिदं पूर्वकल्पे देवमुनिगन्धर्वकिंररादयः भक्त्या आचरितवन्तः।

हे धर्मराज! अतस्त्वपि इदं व्रतं नियमेन आचर। तव राज्यसम्पत्प्राप्तिविजयः भवेत्। इदं व्रतमाचर्य दमयन्ती नळं भर्तारमवाप श्रीकृष्णः जम्बवतीं शमन्तकमणिंच अलभत् तत्कथां श्रुणु -

पुरा सत्राजिन्नाम राजा सूर्यवरप्रभावात् प्रत्यहं १९७२ किलोपरिमाणसुवर्णप्रद शमन्तकदिव्यमणिमवाप। सत्राजित्सोदरः प्रसेनः इदं मणिं सत्राजित्सकाशादवाप।

पश्चादिदं मणिं धृत्वा स्वसकाशमागतं सत्राजितं दृष्ट्वा मणिमिदं मह्य देहीति कृष्णप्रार्थनां तिरश्चकार। कदाचित् प्रसेनः मणिमिदं धृत्वा मृगयाव्यापारमगमत्। तत्र सिंहः मणिमिदं मांसखण्डः इति भ्रमात् तं प्रसेनं हत्वा मणिं स्वीकृत्य गच्छन् भल्लूकेनहतः। जाम्बवान् भल्लूकः तं मणिं स्वीकृत्य पर्वतगुहासु डोलायां शयितायै स्वसुतायै जाम्बवत्यै क्रिडावस्तुरूपेण ददौ।

प्रसेनजिन्मरणं श्रुत्वा सत्राजित् कृष्णः कोपेन मणिः मह्यं नदत्तः इति कृष्ण एव प्रसेनजितं ममारेति प्रकटीचकार। सिंहः एव प्रसेनजितं ममार किल परन्तु निन्दारोपणं कृष्णे पतितम्। श्रीकृष्णः निन्दापरिहारार्थं मण्यन्वेषणार्थं अटवीं गत्वा तत्र मृतं प्रसेन सिंहपादमुद्राचिह्नैः पर्वतगुहामपश्चत्। तत्र कृष्णः मणिना कन्दुकक्रिडामाचरन्तीं (जाम्बवत्पुत्रीं) जाम्बवतीमपश्यत्। कृष्णेन मणौ गृह्यमाने सति जाम्बवानागत्य निरुद्धवान्। द्वयोः अष्टाविंशतिदिनपर्यन्तं युद्धमभूत्। अन्ते जाम्बवान् बलहीनो भूत्वा त्रेतायुग श्रीरामः एव अयमिति ज्ञात्वा अपराद्यं क्षमस्वेति त्रेतायुगे वरग्रहणाय अभ्यर्चितोऽहं त्वया द्वन्द्वयुद्धमयाचम्। तदा भवन्तः भविष्यत्काले तवाभिलाषं पूरीकरिष्यामीति ऊचुः। तदारभ्य त्वन्नमैव स्मरामि। अस्मिन्दिने मदद्दष्टवशात् मदभिलाषः सम्पूर्णः क्षम्यताम् मद्दोषः इति जाम्बवान् प्रार्थयामास।

तदा श्रीकृष्णः सन्तुष्टः शमन्तकमण्यपहरणनिन्दापरिहणाय अहमत्र आगतः। मणिः दीयतामिति पृष्टः जाम्बवान् शमन्तमणिना सह स्वदुहितरं जाम्बवतीमपि बहुमानपत्नीरूपेण कृष्णाय ददौ।

श्रीकृष्णः शमन्तकमणिना कन्याकामणिना सह द्वारकानगरं प्राप्य सत्राजितमाहूय सभायां सर्वं वृत्तान्तं श्रावयामास। तच्छ्रुत्वा सत्राजित् पश्चात्तप्तः मणिना सह स्वदुहितरं सत्यभामामपि पत्नीरूपेण ददौ। कृष्णः मणिः मम मास्तु इति सत्यभामां स्वीकृत्य शुभमुहूर्ते एकवारमेव जाम्बवती सत्यभामे पर्यणैषीत्।

विनायकचतुर्थ्यां क्षीरचन्द्रदर्शनात् निन्दा प्राप्तेति लम्बोदरविनायकं दृष्ट्वा चन्द्रः परिहासश्चकार। तदा कुपिता पार्वती “हे चन्द्र! चतुर्थ्यं तव मुखदर्शनात् निष्कारणनिन्दा भवेदिति चन्द्रं शशाप। पश्चात्तप्त चन्द्रः पार्वतीं शापोपशमनाय प्रार्थयामास। तदा पार्वती “भाद्रपद शुद्धचतुर्थ्यां विनायक पूजाचरणात् निन्दानिवारणं भविष्यतीत्येनं अनुगृहीतवती इत्युक्त्वा कदाचित् गोदोहनसमये क्षीरे चतुर्थीचन्द्रदर्शनात् मम इयं निन्दा जातेति विनायकव्रताचरणात् निन्दापरिहारः शुभप्राप्तिः स्यादिति उक्त्वा भाद्रपदशुद्धचतुर्थ्यां चन्द्रे दृष्टऽपि तस्मिन्दिने विनायकव्रतमाचर्य शमन्तकमणिवृत्तान्तश्रवणं अक्षताः शिरसि धारणं कृतश्चेत् निन्दापरिहारः भवेदिति श्रीकृष्णः अनुग्रहवचनं ददौ।

पुरा भगीरथः भूलोकं प्रति गङ्गानयनसमये, देवदानवैः अमृतार्थं क्षीरसागरमथनसमये, साम्बः स्वकुण्ठुरोगपरिहारार्थं व्रतमिदमाचर्य स्वाभीष्टं साधयाम सुरितिव्यवरीत्।

एवं सूत महामुनिप्रोक्तरीत्या धर्मराजः व्रतमिदं भक्तिश्रद्धाच्यामाचर्य शत्रून् जित्वा स्वराज्यसुखमवाप। विनायकपूजया सर्वाभीष्टसिद्धिर्भवेत्। अतः एवं वरसिद्धिविनायकः इति कीर्तयन्ति। विनायकस्वामि पूजया विद्यार्थिभ्यः विद्या, जयाभिलाषिणां जयः, सन्तानभिलाषिणां सत्सन्तानप्राप्तिः, भर्तुकामिनां सद्भर्ता सीमन्तनीनां सौभाग्यं विधवाभ्यः पुन र्जन्मनि अवैधव्यं च सिद्ध्येयुः। वर्णवयोभेदेन विना यथाविधि व्रताचरणात् विनायककृपया सर्वकार्य सिद्धिः पुत्रपौत्रप्रपौत्रादि वृद्धिः स्यात्। सर्वसम्पत्प्रप्त्या सर्वविघ्ननिवारिताः, सर्वकार्याणि निराटङ्कं साधयित्वा विजयं प्राप्नुयुः इत्युक्तम्।

**फलशृतिः -**

व्रतकथा श्रावकेभ्यः, श्रोतृभ्यः सकलशुभफलानि विनायक कृपया सिद्ध्यन्ति।



# तरिगोण्डवेङ्गमाम्बा-वर्धन्ती



(अष्टमपुटात्)

**गुरुवर्योपदेशः** - भर्तुमरणानन्तरं वेङ्गमाम्बाजीविते महापरिणतिरागता। तस्यां निगूढ वैराग्यभावः आध्यात्मिकज्ञानसक्तिः प्रवृद्धा। पिता तस्याः जीवितं शान्तिमयंकर्तुं प्रायतत। सुब्रह्मण्यशास्त्रीति महावेदान्ती, विद्यारण्यस्वामि गुरुपरम्परानुबन्धी राजयोगी मदनपल्ली - ग्रामवासी तस्याः वेङ्गमाम्बायाः पितुः पूर्वपरिचितः आसीत्। सः स्वदुहितः उत्तमाध्यात्मिकगुरुरिति मत्वा तत्सकाशं मदनपल्ली वेङ्गमाम्बया सह जगमा। मदनपलयाः पश्चिमदिशि बेङ्गलूरुगमनवीथीसमीपे प्राचीनशिवालये गुरुः सुब्रह्मण्यशास्त्री गृहस्थः वानप्रस्थाश्रमजीवनं यापयति स्म। तत्र आलयस्य योगभोगेश्वर स्वामी सुब्रह्मण्यशास्त्रिणः आराध्यदैवमासीत्। कृष्णय्यार्यः वेङ्गमाम्बा च तदालयस्थ स्वामि दर्शनं प्रापतुः। ततः कृष्णय्यार्य सूचनया सुब्रह्मण्ययोगीन्द्रः तां कैश्चित्प्रश्नैः परीक्षितवान्। तस्याः समाधानैः तस्याः वैराग्यपद्धत्या सन्तुष्टः तस्याः ब्रह्मविद्योपदेशं कृत्वा आध्यात्मिकगुरुपरम्परा श्रद्धाभक्तिभिः वाचयन् स्मारयामास। पञ्चदशीमन्त्रं नारसिंहमन्त्रराजञ्च उपदिश्य पुनश्चरण विधानञ्च व्यवृणोत्। ततः योगाभ्यासं विशदीचकार। वेङ्गमाम्बा सुब्रह्मण्यस्वामिशिष्या भूत्वा मन्त्रजपयोग साधनमाचरन्ती किंञ्चित्कालपर्यन्तं आश्रमजीवितं विशिष्टतया निर्वर्तयामास। ततः गुरुः स्वतन्त्रयोगाचरणेन ब्रह्मज्ञानं प्राप्स्यतीति विश्वासात् ततः तां तरिगोण्ट ग्रामगमनाय अनुमतिं ददौ। गुरुस्साक्षात् परं ब्रह्म इति परिपूर्ण विश्वासेन सा आध्यात्मिक तेजसाप्रकाशन्ती गुरुं नमस्कृत्य तरिगोण्डग्राममाजगाम। तत्र मन्त्रजपयोगाभ्यासपरा लक्ष्मीनृसिंहस्वामिनमाराधयन्ती अचञ्चलदीक्षया महोन्नतस्थानमवाप।

**सरस्वतीसाक्षात्कारः** - एकदा मध्यह्ने योगसाधनानन्तरं आकाशे शून्यं पश्यन्ती काश्चिदक्षरपक्तयः प्रकाशमानाः आकाशादागत्य स्वमुखे प्राविशन्निव विचित्रानुभूतिं प्राप्ता। तत्क्षणं स्वस्यां नूतनशक्तिः आविशदिति स्वयममन्यत। स्वानुभवं मदनपल्लीं गत्वागुरवेनिवेदितवती। गुरुः अचिरकाले तस्याः योगफलं लब्धमिति तत्सन्निवेसान्तरार्थं एवं विशदीचकार - वेङ्गमाम्बे! पूर्वपुण्यविशेषात् योगविद्यायां परिपूर्णता समागता। सरस्वतीदेवी अक्षररूपेण त्वयि आविष्ठा इतः परं योगसाधनेन सह भक्तिकविता रचना पराभव। उत्तमकविता तपस्समा। तया कवितया परात्परसेवालोकोद्धरणञ्च भविष्यति। मद्वचनानि त्वदिष्टदैवलक्ष्मीनृसिंहस्वाम्यादेशः इव भावय। वक्ता वाचकश्चस एव भगवन् भविष्यतीति प्रोत्साह्य तस्याः आशीर्दत्वा प्रेषयामास। वेङ्गमाम्बा इमामन्नुभूतिं स्वकृतौ वेङ्कटाचलमाहात्म्ये वर्णयामास। अक्षरज्ञानच्छन्दोज्ञान अलङ्करशास्त्रज्ञान, प्राचीनकाव्येतिहासपरिशीलनाभावेऽपि लक्ष्मीनृसिंहस्वाम्यनुग्रहात् गुर्वनुग्रहात् तरिगोण्डनृसिंह। दयापयोनिधे इति भगवन्तं स्मरन्ती कवितारचनायां प्रविष्ठासीत्। प्रथमतः सा १०३ पद्यैः नृसिंहशतकं, प्रणिनाय। ततः आत्मनि कुविमर्शकानां सद्बुद्धिं देहीति भक्तिभावेन नृसिंहस्वामिनं प्रार्थयन्ती शतकमेकं रचयामास।

(अनुवर्तिष्यते)

# हयग्रीवजयन्ती

कुमारी लिङ्गरेड्डि उमामहेश्वरी
चरवाणी - ९१८२०७५७६१



शङ्खचक्रमहामुद्रापुस्तकाढ्यं चतुर्भुजं।
सम्पूर्ण चन्द्रसङ्काशंहयग्रीवमपास्महे।।

स्फटिकमणिसदृशाढ्यः शङ्खचक्रमुद्रापुस्तकैः संयुक्तः चतुर्भुजयुतः श्रीहयग्रीवस्वामी राराजते। तं हयग्रीवस्वामिनं ज्ञानार्थं विद्यार्थं सकलगुणसम्पत्साधनार्थं चिन्तनं ध्यानं उपासनं अर्चनं च करोमि।

अयं च हयग्रीवस्वामी श्रावणमासे श्रवणानक्षत्रे पूर्णिमायां तिथौ सकलजनानां ज्ञानप्रदानार्थं अवततार। श्रीमहाविष्णुरेव यज्ञमूर्तिः। अमुं यज्ञमूर्तिः श्रुतिमन्त्रैः आराध्य। तस्यानुग्रहः संपादनीयः इति। तत्र विद्यमाना, मन्त्राः यज्ञकर्म यज्ञाधिनाष्ठानदेवः इति त्रयः ये अंशाः सन्ति तेषां त्रयाणां अंशानां समाहाररूप एव हयग्रीवमूर्तिः भवेत्।

भगवतः एकविंशत्यवतारेषु अन्यतमः अयम्। धर्मसूत्राणाञ्च ज्ञानप्रसारार्थं प्रचारार्थं परविद्यायाः आधारार्थं हयग्रीवमूर्तिः विभवरूपेण अवततार। असौ हयमुखः। अस्य हयनादद्वारा समस्ताः नैकाः विद्याः सम्भूताः आसन्। ताः विद्याः बीजाक्षराणां मूलभूता एव।

श्रीहयग्रीवमूर्तेः उच्छासनिश्शवासः एव वेदाः। तस्य शङ्खं वेदरूपं, चक्रं विश्वकालचक्रस्वरूपं, चिन्मुद्रा ब्रह्मविद्यायाः आधाररूपा, तस्य स्वरूपं चन्द्रसङ्काशसदृशं च भवति।

मधुकैटभसंहारार्थं श्रीमहाविष्णुः हयग्रीवरूपं धृत्वा ताभ्यां मधुकैटयास्यां युद्धं कृत्वा तौ मारितवान्। तत्रापि भवन्तौ द्वौ वैरभक्त्य मां अनुक्षणं स्मरन्तौ अपि युद्धं कृतवन्तौ इति उक्त्वा तयोः अनुग्रहपूर्वकशिक्षां दत्वा मुक्तिं दत्तवान् हयग्रीवः।

वेदरक्षणार्थं धर्मसंस्थापनार्थं विद्यमानः असौ हयग्रीवमूर्तिः वेदान् राक्षसेथ्यः समाकृष्य चतुर्मुखाय प्रदत्वा धरणीं वामभागे संस्थाप्य ज्ञानमुद्रया सर्वान् देवताब्रुन्दान् अनुगृहीतवान् इति विष्णोः विभवरुपाणां असौ प्रप्रथमः इति अनेनैव वेदसंरक्षणं अभूदिति असौ ज्ञानमूर्तिः विद्यामूर्तिः धर्ममूर्तिः इति च देवाः सर्वे स्तुतिं अकुर्वन्।

यज्ञस्य हविर्भागं प्रदातुं श्रीमहाविष्णुं योगनिद्राया उत्थापयितुं देवताबृन्दानां साहाय्येन धनुषः रज्जुना श्रीमहाविष्णोः मुखं विभागं कृतमिति पश्चात् देवाः सर्वेऽपि श्रीमहाविष्णुं संप्रार्थ्य हयमुखं संस्थाप्य क्षमायाचनं अकुर्वन् इति च कथा वर्तते। हयग्रीवः विद्याधिदेवता। विद्याभ्याससमये हयग्रीवस्वामिनः आराधनं अवश्यं कुर्वन्ति सर्वे।

वेदान्तदेशिकः हयग्रीवस्तोत्रं कृतवान्। तस्यां स्तुतौ द्वात्रिंशत् श्लोकाः सन्ति। तेषां सारः कः इति चेत् हयग्रीवस्य मुखात् समागतः ध्वनिविशेषः वेदनादैः समानतया प्रतिभाति। हल हल ध्वनिना - असन्दर्भ - दुष्ट, अज्ञान, तिमिरदोषान् दूरीकृत्य वाजिवक्त्रः वासुदेवः मम अभिमुखे सर्वदा साक्षात्करोतु इति।



सत्यमूलानि सर्वाणि सत्यान्नास्ति परं धनम्।

विशुद्धविज्ञानधनस्वरूपं
विज्ञानविश्राणन बद्धदीक्षम्।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये।।

ज्ञानरूपं विशुद्धं विज्ञानमूलरूपं दयानिधिं सर्वेषां आश्रयप्रदातारं हयग्रीवं शरणं प्रपद्ये। ज्ञानिनः व्यासादयः सर्वेऽपि भगवतः अवताररूपा एव।

प्रणवस्वरूपः भगवान् श्रीहयग्रीवमूर्तिः। प्रणवं मन्त्राणां मातृरूपं भवेत्। उपनिषदां आदारभूतः प्रणवः इति हेतोः सर्वेषां आधारभूतः श्रीहयग्रीव एव भवेत्। सर्वेषां तपसः तेजोरूपं संपत् श्रीहयग्रीवस्वामिनः पादपद्मं एव। तयोः पादपद्मयोः प्रणामान् समर्प्य मुक्तिं साधयामः।

ज्ञानामृतं प्रदातुं स्फटिकाक्षमालां धरन्तं, भगवतः श्रीहयग्रीवमूर्तेः दक्षिणहस्तं, ज्ञानसमुद्रामिवोद्वहन्तं पुस्तकं धरन्तं वामहस्तं च ध्यायामि कर्मणा मनसा वाचा।

व्याख्यामुद्रा - पुस्तकं - शङ्खं - चक्रं च चतुर्षु, हस्तेषु धृत्वा धवलवर्णेन विभ्राजमानं वागधीशं भगवन्तं हयग्रीवं ध्यायामि, मम चित्ते सर्वदा भवतु इति स्तुतेः सारांशः।

हयग्रीवमन्दिराणि -

प्रधानतया हयग्रीवमन्दिराणि अस्माकं भारते अष्टौ विद्यन्ते। तानि तावत्

१. कडलूरुक्षेत्रे तिरुवगिनन्तपुरं हयग्रीवमन्दिरम्
२. चेन्नै पट्टणे देवनाथस्वामि मन्दिरम्
३. अस्सां राज्ये हयग्रीवमन्दिरम्
४. बेङ्गलूरु पट्टणे लक्ष्मीहयग्रीवमन्दिरम्
५. आन्ध्रदेशे महबूबनगरे श्रीलक्ष्मीहयग्रीवमन्दिरम् नड्गनल्लूर
६. चेन्नै पट्टणे हयग्रीव आलयः
७. यादगिरि क्षेत्रे श्रीहयग्रीवमन्दिरम् मलिकीपट्टणं
८. आन्ध्रदेशे हयग्रीवालयः इति प्रधानमन्दिराणि भवन्तीति ज्ञायते। अन्यानि च मन्दिराणि तत्र तत्र नैकानि सन्ति।

श्रीमान्! हयानन! विभो! तव सुप्रभातम्।
हरे! वाजिवक्त्र! प्रसीद! प्रसीद!
लक्ष्मीहयानन! चरणौ शरणं प्रपद्ये।
सर्वविद्यास्वरूपाय हयग्रीवाय मङ्गलम्।

इति सुप्रभात - स्त्रोत्र प्रपत्ति - मङ्गलाशासनश्लोकाः विराजन्ते।

ओं उद्गीथप्रणवोद्गीथ सर्व वागीश्वरेश्वर!
सर्वदेवमयाचिन्त्य सर्वं बोधय बोधय।।
ओं विद्याधाराय विद्महे ज्ञानमुद्राय धीमहि।
सर्वदेवमयाचिन्त्य सर्वं बोधय बोधय।।
ओं विद्याधराय विद्महे ज्ञानमुद्राय धीमहि।
तन्नो हयग्रीवः प्रचोदयात्।।

त्यक्त्वा सर्वाणि कर्माणि हयग्रीव! इति स्मर दत्वा ज्ञानं ब्रह्मविद्यां मोचय बन्धनात्।''

इति महामन्त्रानुष्ठानप्रकारः तन्तग्रन्थेषु उपदिश्यते।

शङ्खचक्रमहामुद्रापुस्तकाढ्यं चतुर्भुजम्।
सम्पूर्णचन्द्रसङ्काशं हयग्रीवमुपास्महे।
ओं श्रीं इति हे अक्षरे ह्लौं इत्येकाक्षरम्।
ओं नमो भगवतः इति सप्ताक्षराणि हयग्रीवायेति
पञ्चाक्षराणि विष्णवे इति त्रीण्यक्षराणि मह्यं मेधां प्रज्ञां
इति षडक्षराणि प्रयच्छ स्वाहा इतः पञ्चाक्षराणि हयग्रीवस्य तुरीयो भवति इति आथर्वण हयग्रीवोपनिषदि वर्तते।

इत्थं श्रीमहाविष्णुस्वरूपस्य आद्यवताररूपस्य श्रीहयग्रीवस्य वैशिष्ट्यं स्वरूपं तत्त्वं मन्त्रश्रुतिस्मृतिपुराण ग्रन्थेषु उपदिश्यन्ते।

आस्तिकाः सर्वे एतत् सर्वं साङ्गोपाङ्गं अध्ययनं कृत्वा ज्ञानं संपाध्य श्रीहयग्रीवस्वामिणः अनुग्रहपात्राः भवन्तु इत्याशास्य विरमामि।

चित्रकथा

# विनायकाय प्रथमनमस्काराभावे विघ्नाः एव

तेलुगुमूलम् - 'कलारत्न' डा.कम्पेल्ल रविचन्द्रन्
चित्राणि - श्री तुम्बलि शिवाजी
संस्कृतानुवादः - डा.के .सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०






अपन्थानन्तु गच्छन्तं सोदरोऽपि विमुञ्चति।



दूरे गणपतिः ब्रह्मचारिरूपेण दृष्टः।
कुमार! सूर्यास्तमयः भवति मम एकं उपकारं करिष्यसि वा? अहं सन्ध्यावन्दनं समाप्य आगमिष्यामि तावत्पर्यन्तं ज्योर्तिलिङ्गमिदं धारय।
एतत्कर्मकरणार्थमहं किमर्थं? जलाशयतीरे निवेशय, निवेश्य सन्ध्यावन्दनं कुरु।
कुमार! तथा न कर्तव्यम्। तथा कृतश्चेत् फलं न लभेत्। हस्तेनैव आत्मलिङ्गं धार्यम्।
भवतु! दीयताम्। लिङ्गमिदं महाभारभूतं भवति।
आर्य! अहं यावच्छक्ति भरिष्यामि। भरणशक्तिहीनश्चेदहं वारत्रयमाह्वयिष्यामि। झटिति त्वं नागतोऽसिचेत् पश्चादहं लिङ्गस्यास्य बाध्यः न भविष्यामि।
आह्वानादेव आगमिष्यामि
हे रावण! रावण
अद्य वारत्रयमाह्वयामि रावण?
शिवलिङ्गं विनायकः भूमौ निवेशयामास
बालकः त्वं मम विघ्नेश्वरः सञ्जातः। भूमौ आत्मलिङ्गं निवेशितोऽसि ।
रावण! गणपतये आद्यपूजानाचरणात् एवं जातम्। दैवं तव प्रतिकूलं जातम्। इतः परं प्रत्यान्मायं कर्म किमपि नास्ति। लङ्कानगरं गच्छ।
शिवः - रावण! अमेयभक्त्या मामाराध्य तोषयित्वा आत्मलिङ्गं प्राप्तोऽसि। तव चरितममरम्। एतद्दिनादारभ्य इदं गोकर्णक्षेत्रं भूकैलासः इति प्रसिद्धिमेष्यति। अत्र आगताः भक्ताः विघ्नेश्वरं पूजयिष्यन्ति।
लोकास्समस्ताः सुखिनो भवन्तु।

# बालविनोदिनी

प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?



अस्य चित्रपटस्य रञ्जनं कुर्मः वा?



गजः कं मार्गं अनुसृत्य कदलीफल-इक्षुखण्ड-कपित्थ सकाशमागमिष्यति।





मार्गं अण्विषन्तु



दृश्यमानानि चित्राणि अवलोक्य किं चित्रम् किं पर्व सूचयति इति वदन्तु।



विषमप्यमृतं क्वचित् भवेदमृतं वा विषमीश्वरेच्छया।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D.,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



30.06.2025 आरभ्य 02.07.2025 पर्यन्तम् श्रीनिवासमङ्गापुरम्, श्रीकल्याण वेङ्कटेश्वरस्वामिने वसन्तोत्सवः अत्यन्तवैभवेन सम्पन्नः। अस्मिन् सन्दर्भे श्रीनिवासः महाशेषवाहने हनुमद्वाहने, गरुडवाहने च भक्तेभ्यः अनुग्रहदर्शनभाग्यं दत्तवन्तः।




23.06.2025 तिथौ तिरुमलक्षेत्रस्थ लड्डुविक्रयकेन्द्रे भक्तसौकर्यार्थं लड्डुस्वीकरणसमयं न्यूनीकर्तुं कियोस्कोमिषन् द्वारा दर्शनटिकेट् प्राप्तेभ्यः, दर्शनटिकेट् अप्राप्तेभ्यश्च भक्तेभ्यः द्वे अधिकलड्डु प्राप्तुं आधारपत्रं दर्शयित्वा स्वीकर्तुं सौकर्यं कृतम्। यूपी.ए. माध्यमद्वारा आधाररुपेण प्रदत्तधनपत्रमपि दीयते।




21.06.2025 तिथौ तिरुपति ति.ति.देवस्थान परिपालनभवनप्राङ्गणस्थले अन्तरराष्ट्रीय योगदिवस कार्यक्रमः ति.ति.देवस्थानेन आयोजितः। अस्मिन् सन्दर्भे ति.ति.देवस्थान धर्मकर्तुमण्डलीसदस्या श्रीमती पनबाकलक्ष्मी, श्री जी भानुप्रकाशरेड्डि, ति.ति.देवस्थानस्य अनुबन्ध ई.ओ, श्री सी.हेच्.वेङ्कय्यचौदरी ए.आर्.यस्., जे.ई.ओ., श्री वी.वीरब्रह्मम्., ऐ.ए.एस्., सि.वी यस्.ओ श्री के.वी.मुरलीकृष्ण ऐ.पी.यस्., ति.ति.देवस्थान उद्योगिनः विद्यार्थिनश्च भागं गृहीतवन्तः।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-07-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 5th of every month.



श्रीगणेशचतुर्थी (27.08.2025)